001264

Indira Gandhi National
Centre for the Arts

४०८९

एष वै यजमानः। यद्यूपः। सर्वदेवत्यं वासः। सर्वाभिरेवैनं देवताभिः समर्द्धति।
अथो आक्रमणमेव तत्सेतुं यजमानः कुरुते। सुवर्गस्य लोकस्य समष्ट्यै। द्वाद
श वाजप्रसवीयानि जुहोति ॥३॥ द्वादश मासाः संवत्सरः। संवत्सरमेव प्री
णाति। अथो संवत्सरमेवास्मा उपद्यौदेति। सुवर्गस्य लोकस्य समष्ट्यै। दश
भिः कल्पैरोहति। न वै पुरुषे प्राणाः। नाभिर्दघ्नमी। प्राणानेव यथास्था
नं कल्पयित्वा। सुवर्गं लोकमेति। एतावद्वै पुरुषस्य स्वम् ॥४॥ यावत्प्राणाः।
यावदेवास्यास्ति। तेन सह सुवर्गं लोकमेति। सुवर्देवाँ अगन्मेत्याह। सुव
र्गमेव लोकमेति। अमृता अभूमेत्याह। अमृतमिव हि सुवर्गो लोकः। प्रजाप
तेः प्रजा अभूमेत्याह। प्राजापत्यो वा अयं लोकः। अस्मादेव तेन लोकान्नैति ॥५॥
समहं प्रजया सं मया प्रजेत्याह। आशिषमेवैतामाशास्ते। आसपुटैर्घ्नन्ति। अ
न्नं वा इयं। अन्नाद्येनैवैनं समर्द्धयति। तुषैर्घ्नन्ति। एते [illegible] अन्न

Indira Gandhi National Centre for the Arts

॥२८॥ यद्रूपाः। साक्षाद्देवैनमन्नाद्येन समर्द्धयति। पुरस्तात्प्रत्यंचं घ्नंति॥६॥ पुर
स्ताद्धि प्रतीचीनमन्नमद्यते। शीर्षतो घ्नंति। शीर्षतो ह्यन्नमद्यते। दिग्भ्यो घ्नं
ति। दिग्भ्य एवास्मा अन्नाद्यमवरुंधते। ईश्वरो वा एष पराङ्प्रदघः। यो
ऽरूपयं शो हति। हिरण्यमध्यवरोहति। अमृतं वै हिरण्यम्। अमृत एवैतत्स्
वर्गे लोके॥७॥ अमृत एव स्वर्गे लोके प्रतितिष्ठति। शतमानं भवति।
शतायुः पुरुषः शतेन्द्रियः। आयुष्येवेन्द्रिये प्रतितिष्ठति। पुष्ट्यो वा एतद्रूपं
यदजाः। त्रिः संवत्सरस्यान्यान्पशून्परि प्रजायते। बस्ताजिनमध्यवरोहति।
पुष्ट्यामेव प्रजनने प्रतितिष्ठति॥८॥ परिव्याचति गोध्रमाञ्जुहोति स्वंनेति
प्रत्यंच्वं घ्नंति लोकोनवच॥७॥ सप्तान्नहोमाञ्जुहोति। सप्त वा अन्नानि। या
वंत्येवान्नानि। तान्येवावरुंधे। सप्त ग्राम्या ओषधयः। सप्तारण्याः। उभ ॥२८॥

यीभामवरुंध्यै। अन्नस्यान्नस्य जुहोति। अन्नस्यावरुध्यै। यद्वाजपेययाज्य
नवरुद्धं स्यादश्नीयात्॥१॥ अवरुद्धेन व्युच्येत। सर्वस्य समवदाय जुहोति।
अनवरुद्धस्यावरुध्यै। औदुंबरेण स्रुवेण जुहोति। ऊर्ग्वा अन्नमुदुंब
रः। ऊर्ज एवान्नाद्यस्यावरुध्यै। देवस्य त्वा सवितुः प्रसव इत्याह। सवितृ
प्रसूत एवैनं ब्रह्मणा देवताभिरभिषिंचति। अन्नस्यान्नस्याभिषिंचति।
अन्नस्यान्नस्यावरुध्यै॥२॥ पुरस्तात्प्रत्यंचमभिषिंचति। पुरस्ताद्धि प्रती
चीनमन्नमद्यते। शीर्षतोऽभिषिंचति। शीर्षतो ह्यन्नमद्यते। आमुखा
दन्ववस्रावयति। मुखत एवास्मा अन्नाद्यं दधाति। अग्नेस्त्वा साम्राज्ये
नाभिषिंचामीत्याह। एष वा अग्नेः सवः। तेनैवैनमभिषिंचति। इंद्र
स्य त्वा साम्राज्येनाभिषिंचामीत्याह॥३॥ इंद्रियमेवास्मिन्नेतेन दधाति।

Indira Gandhi National Centre for the Arts

॥२७॥ बृहस्पतेस्त्वा साम्राज्येनाभिषिंचामीत्याह। ब्रह्म वै देवानां बृहस्पतिः। ब्रह्मणै-
वैनमभिषिंचति। सोमग्रहाँश्चावदानीयानि चर्त्विग्भ्य उपहरंति। अमु-
मेव तैर्लोकमन्नवंतं करोति। सुराग्रहाँश्चानवदानीयानि च वाजसृ-
द्भ्यः। इममेव तैर्लोकमन्नवंतं करोति। अथो उभयीष्वेवाभिषिच्यते। विमा-
थं कुर्वते वाजसृतः॥४॥ इंद्रियस्यावरुध्यै। अनिरुक्ताभिः प्रातःसव-
ने स्तुवते। अनिरुक्तः प्रजापतिः। प्रजापतेराप्त्यै। वाजवतीभिर्माध्यंदि-
ने। अन्नं वै वाजः। अन्नमेवावरुंध्यै। शिपिविष्टवतीभिस्तृतीयसवने
। यज्ञो वै विष्णुः। पशवः शिपिः। यज्ञ एव पशुषु प्रतितिष्ठति। बृहदं-
त्यं भवति। अंतमेवैनं श्रियै गमयति॥५॥ अग्नी पार्दिन्नस्यान्नेस्या-
वरुध्या इंद्रस्यत्वा साम्राज्येनाभिषिंचामीत्याह वाजसृतः शिपिःष्टणि च॥ च्या
॥२७॥

नृषदं त्वेत्याह। प्रजा वै नृ। प्रजानामेवैतेन सूयते। द्रुषदमित्याह। वन-
स्पतयो वै द्रु। वनस्पतीनामेवैतेन सूयते। भुवनसदमित्याह। यदा वै व-
सीयान्भवति। भुवनमगन्निति वै तमाहुः। भुवनमेवैतेन गच्छति॥१॥ अप्सु-
षदं त्वा घृतसदमित्याह। अपामेवैतेन घृतस्य सूयते। व्योमसदमित्या-
ह। यदा वै वसीयान्भवति। व्योमागन्निति वै तमाहुः। व्योमैवैतेन गच्छति।
पृथिविषदं त्वान्तरिक्षसदमित्याह। एषामेवैतेन लोकानाँ सूयते। तस्मा-
द्वाजपेययाजी न कंचन प्रत्यवरोहति। अपीव हि देवतानाँ सूयते॥२॥
नाकसदमित्याह। यदा वै वसीयान्भवति। नाकमगन्निति वै तमाहुः।
नाकमेवैतेन गच्छति। येन्हाः पंचजनीनामित्याह। पंचजनानामेवै-
तेन सूयते। अपाँ रसमुद्वयसमित्याह। अपामेवैतेन रसस्य सूयते।

Indira Gandhi National
Centre for the Arts

॥३०॥ स्वधायै त्विमं समानतमित्याह सकृत्कव्यायाः ।३। गच्छति स्वयं तेन वच ।४। इंद्रो वृ
त्रं हत्वा । असुरान्पराभाव्य । सोमाकाश्यां प्रत्यागच्छत् । ते पितरः पूर्वेद्युराग
च्छन् । पितृन्यज्ञो गच्छन् । तं देवा पुनरयाचंत । तमेभ्यो न पुनरददुः । ते अ
ब्रुवन्वरं वृणामहै । अथ वः पुनर्दास्यामः । अस्मभ्यमेव पूर्वेद्युः क्रियाता इति
।१। तमेभ्यः पुनरददुः । तस्मात्पितृभ्यः पूर्वेद्युः क्रियते । सपितृभ्यः पूर्वेद्युः
करोति । पितृभ्य एव तद्यज्ञं निष्क्रीय यजमानः प्रतनुते । सोमाय पितृपीताय
स्वधा नम इत्याह । पितुरेवाधि सोमपीथमवरुंधे । नहि पिताप्रमयमाण
आहेष सोमपीथ इति इंद्रियं वै सोमपीथः । इंद्रियमेव सोमपीथमवरु ॥२०॥
ध्ये । तेनेन्द्रियेण द्वितीयांजायामभ्यश्नुते ।२। एतद्वै ब्राह्मणं पुरा वाजश्र
वसा विदामक्रन् । तस्मात्त्वे द्वे जाये अभ्याकृत । यएवं वेदाभि द्वितीयां
जायामश्नुते । अग्नये कव्यवाहनाय स्वधा नम इत्याह । य एव पितृणामग्निः

तं प्रीणाति । तिस्र आहुतीर्जुहोति । त्रिर्निदधाति । षट्संपद्यंते ।३। षड्वा ऋतवः
। ऋतूनेव प्रीणाति । तूष्णीं मेक्षणमादधाति । अस्ति वाहि षष्ठ ऋतुर्न वा ।
देवान्वै पितृन्प्रीतान् । मनुष्याः पितरोऽनुप्रपिबते । तिस्र आहुतीर्जुहोति ।
त्रिर्निदधाति । षट्संपद्यंते । षड्वा ऋतवः ।४। ऋतवः खलु वै देवाः पितरः ।
ऋतूनेव देवान्पितृन्प्रीणाति । तान्प्रीतान् । मनुष्याः पितरोऽनुप्रपिपते ।
सकृदाच्छिन्नं बर्हिर्भवति । सकृदिव हि पितरः । त्रिर्निदधाति । तृतीये
वा इतो लोके पितरः । तानेव प्रीणाति । पराङावर्त्तते ।५। ह्रीका हि पितरः ।
ओष्मणो व्यावर्तत उपास्ते । ऊष्मभागा हि पितरः । ब्रह्मवादिनो वदं
ति । प्राशित्रा ३ न्न प्राशित्रा ३ मिति । यत्प्राश्नीयात् । जन्यमन्नमद्यात् । प्र
मायुकः स्यात् । यन्न प्राश्नीयात् । अहविः स्यात् ।६। पितृभ्य आ

Indira Gandhi National Centre for the Arts

॥२१॥ वृश्चेत।अववृश्च्येत वा।तंनेनप्राशितंनेवाप्राशितंस्यात्।वीरंवावै
पितरःप्रयंतोहरंति।वीरंवाददति।दर्शाद्धिनेति।हरएतम्
गाहिपितरः।पितॄनेवतिरवदधते।उत्तरआयुषिलोम
छिन्द्यात्।पितॄणांह्येतद्धिनेदीयः॥७॥नमस्करोति।नमस्का
रोहिपितॄणाम्।नमोवःपितरोरसाय।नमोवःपितरःशुष्माय
नमोवःपितरोजीवाय।नमोवःपितरःस्वधायै।नमोवःपि
तरोमन्यवे।नमोवःपितरोघोराय।पितरोनमोवः।यएत
स्मिंल्लोकेस्थ॥८॥युष्मांस्तेनु।येस्मिंल्लोके।मांतेनु।यएतस्मिं
ल्लोकेस्थ।यूयंतेषांवसिष्ठाभूयास्त।येस्मिंल्लोके।अहंतेषांव ॥२१॥

सिष्ठोभूयासमित्याहावसिष्ठःसमानानांभवति।यएवंविद्वान्पितृभ्यःकरो
ति।एवंवैमनुष्याणांयज्ञः॥९॥देवाल्लोकाइतरेयज्ञाः।तेनवाएतत्पि
तृलोकेचरति।यत्पितृभ्यःकरोति।सईश्वरःप्रमेतोः।प्राजापत्ययज्ञे
पुनरैति।यज्ञोवैप्रजापतिः।यज्ञेनैवसहपुनरैति।नप्रमायुकोभव
ति।पितृलोकेवाएतद्यजमानश्चरति।यत्पितृभ्यःकरोति॥१०॥सईश्वर
आर्तिमार्तोः।प्रजापतिस्त्वावैनंततउन्नेतुमर्हतीत्याहुः।यत्प्राजापत्यय
र्वोपुनरैति।प्रजापतिरेवैनंततउन्नयति।नार्तिमार्छतियजमानः।इत्व
भूतेयद्यंतेपद्यंतेषड्वाऋतवोवर्त्ततेहविश्वान्नेदीयस्ययज्ञोयजमा
नश्चरतियत्पितृभ्यःकरोतियच्चवा॥११॥देवासुराअग्नीषोमयोर्द्वेवोवे
यथाहवैदिवावैपरस्यैगृहेब्रह्मवादिनोनाग्निष्टोमानसावित्रेदेवस्याहं

Indira Gandhi National
Centre for the Arts

तान्वीर्यं सजातं होमान्त यदैत्वेन्द्रो वृत्रं हत्वा दत्रा॥ॐ॥ देवा ह वा अग्निमाज्येषु मंता श्रा
॥३२॥ स्माहु जपयपाजी देवस्याहं वाजस्यावरुध्याइं द्रियमे वाशिमन्त्री काहिपि
तरः पंचषष्टिः॥ॐ॥ म॥ प्रथमाष्टकप्रश्ने तृतीयः प्रश्नः॥ॐ॥ म॥ उत्त
येवा पूते प्रजापते रच्यं सृज्यंत। देवाश्चासुराश्च। तानव्यजानान्यदूमे
न्यइमेन्यइति। सदेवान् सूनंकरोत्। तानन्यसुरान्। तान्व्यविज्ञेणाद्
नात्। तान्यरस्तान्त्यविचेष्व्येग हात्वा तेमहाँजनजन्। तमहाणामहृ
त्वम्॥१॥ देवतावा एता यजमानस्य गृहे गच्छते। मद्रु ग्राः। विदुरे न देवाः।
यएवं विदुषं एतेमहां गच्छंति। एषा वै सोमस्याहुतिः। यदुपांशुः।
सोमेन देवाँ स्तर्पयाणीति खलु वै सोमेन यजते। यदुपांशुं जुहो ॥३२॥
ति। सोमेनैव तद्देवाँ स्तर्पयति। यद्ग्रहं जुहोति। देवानेव तद्देवाजन्
यन्ति। यच्चमसं जुहोति। तेन वा इदं रूपेण यजमानः स्वर्गं लोकमेति।

किन्वेतद्यज्ञ आसीदित्याहुः। यस्मात्राणीति। इदं वा एतद्यज्ञ आसीत्। यज्ञस्य
निवाए तान्यासन्। ते देवान व्यावृत्तमगच्छन्। तए तानि दारुमयाणि प
त्राण्यपश्यन्। तान्यकुर्वत॥३॥ ते वै ते व्यावृत्तमगच्छन्। यद्दारुमयाणि
पात्राणि भवंति। व्यावृत्तमेव तेन यजमानो गच्छति। यानि दारुमयाणि
पात्राणि भवंति। अमुमेव तैर्लोकमभिजयति। यानि मृन्मयानि। इमं
मेव तैर्लोकमभिजयति। ब्रह्मवादिनो वदंति। कस्मात्सत्यात्स्थाली वा
यव्याः सोमग्रहणीरिति। देवा वै पात्रे मदुहन्॥४॥ तस्मात्ते साना
ज्ञामन्न। इदं वै पात्रैः। तामादित्या आदित्यस्थाल्या चक्षुर्वादः यम्रनदु
हन्न। यदादित्यस्थाली भवति। चक्षुष्पद एव तया पशून्यजमान इमान्दुहे।
तां विश्वेदेवा आग्रयणस्थाल्या अदुहन्। यदाग्रयणस्थाली भवति।
॥५॥ ऊर्जमेव तया यजमान इमां दुहे। तां मनुष्या उक्थस्थाल्या यन्नदुहन्।

Indira Gandhi National Centre for the Arts

यद्रुवस्यालीनवति। आयुरेव तया यजमान इमां दुहे। स्यात्लात्र हलति।
॥२२॥ वाचव्येन हुति। तस्मादन्येन पात्रेण पश्चन्दुहंति। अन्येन प्रतिग्रहंति।
अथो व्यावर्तमेव तद्यजमानो गच्छति॥६॥ महत्वं गहं जुहोति। त्वष्टा
र्वै तादृक्षन्नाम यद्यस्यालीनवति नवच॥१॥ युवं सुराममश्वि
ना। नमुचावासुरे सचा। विपिपाना शुभस्पती। इन्द्रं कर्मस्वाव
तं। पुत्रमिव पितरावश्विनोभा। इन्द्रावतं कर्मणा दंसनाभिः।
यत्सुरामं व्यपिबः शचीभिः। सरस्वती त्वा मघवन्नभिष्णक्। ब्राह्मणा ॥२३॥
हाव्यग्ने हविरास्येते। स्रुचीव घृतं चम्वीव सोमः॥१॥ वाज
सनिं रयिमस्मे सुवीरं। प्रशस्तं धेहि यशसं बृहंतं। यस्मिं
सनिं रयिमस्मे सुवीरं। प्रशस्तं धेहि यशसं बृहंतं। वैश्वानरोऽहुतः। की
नभ्यास ऋषभ नासउक्ष एः। वशामेषाअवेस्र ष्टास आहुताः। की

लालपे सोमपृष्ठाय वेधसे। हृदा मतिं जनये चारुमग्नये। नाना हि
वां देवहितं सदो मितम्। मा संसृक्षाथां परमे व्योमन्। सुरा त्व
मसि शुष्मिणी सोम एषः। मा मा हिंसीः स्वां योनिमाविशन्॥२॥
यदत्र शिष्टं रसिनः सुतस्य। यदिन्द्रो अपिबच्छचीभिः। अहं त
दस्य मनसा शिवेन। सोमं राजानमिह भक्षयामि। द्वे स्रुती अ
शृणवं पितॄणाम्। अहं देवानामुत मर्त्यानाम्। ताभ्यामिदं वि
श्वमेजत्समेति। यदन्तरा पितरं मातरं च॥३॥ यस्ते देव वरु
ण गायत्रछंदाः पाशः। तं त एतेनाव यजे॥३॥ यस्ते देव वरुण
त्रिष्टुप्छंदाः पाशः। तं त एतेनाव यजे। यस्ते देव वरुण जगतीछंदाः पाशः

Indira Gandhi National
Centre for the Arts

तं त एतेनावयजे। सोमो वा एतस्य राज्यमादत्ते। यो राजा सन्राज्यो
॥३४॥ वा सोमेन यजते। देवसुवामेतानि हवीꣳषि भवंति। एतावंतो वै
देवानाꣳ सवाः। त एवास्मै सवान्प्रयच्छंति। त एनं पुनः सुवंते रा
ज्याय। देवसू राजा भवति॥४॥ सोमज्ञाविशं न्वजे राज्याय कं चार
उदस्थाद्देव्यदितिर्विश्वरूपी। आयुर्यज्ञपतावधात्। इंद्राय
कृण्वती भागं। मित्राय वरुणाय च। इं वा अग्निहोत्री। इयं वा एतस्य
निषीदति। यस्याग्निहोत्री निषिदति। तामुत्थापयेत्। उदस्थाद्दे
व्यदितिरिति। इयं वै देव्यदितिः॥१॥ इमामेवास्मा उत्थापयति। ॥३४॥
आयुर्यज्ञपतावधादित्याह। आयुरेवास्मिन्दधाति। इंद्राय कृण्व

ती भागं मित्राय वरुणाय चेत्याह। यथायजुरेवैतत्। आवर्त्तीं वा
एतस्य पाप्मानं प्रतिख्याय निषीदति। यस्याग्निहोत्र्युपसृष्टा
निषीदति। तां दुग्ध्वा ब्राह्मणाय दद्यात्। यस्यान्नं नाद्यात्। आव
र्त्तिमेवास्मिन्पाप्मानं प्रतिमुंचति॥२॥ दुग्ध्वा ददाति। न ह्यदुष्टा द
क्षिणा दीयते। पृथिवीं वा एतस्य पयः प्रविशति। यस्याग्निहो
त्रं दुह्यमानꣳ स्कंदति। यद्दुग्धं पृथिवीमसक्त। यदोषध्यी
रत्यसरद्यदापः। पयो गृहेषु पयोऽघ्नियासु। पयो वत्सेषु प
यो अस्तु तन्मयीत्याह। पय एवात्मन्गृहेषु पशुषु धत्ते। अप उप
सृजति॥३॥ अद्भिरेवैनदाप्नोति। यो वै यज्ञस्यार्त्तेनानार्त्तꣳ सं
सृजति। उभे वै ते तर्ह्यार्छतः। आर्छति खलु वा एतदग्निहोत्रम्

Indira Gandhi National Centre for the Arts

यदुह्यमानँ स्कंदति। यद्भिंद्यात्। आर्त्तेनानार्त्तं यज्ञस्य सँ
॥३५॥ सृजेत्। तदेव यादृक्कीदृक्च होतव्यं। अथान्यां दुग्ध्वा पुनर्होतव्यं। अ
नार्त्तेनैवार्त्तं यज्ञस्य निष्करोति॥४॥ यद्धुतस्य स्कंदेत्। य
त्तो हुत्वा पुनरेयात्। यज्ञं विच्छिंद्यात्। यत्र स्कंदेत्। तं निष
च पुनर्गृह्णीयात्। यत्रैव स्कंदति। तत एवैनत्पुनर्गृह्णाति।
तदेव यादृक्कीदृक्च होतव्यं। अथान्यां दुग्ध्वा पुनर्होतव्यं। अ
नार्त्तेनैवार्त्तं यज्ञस्य निष्करोति॥५॥ विनाशात्तस्य यज्ञ[illegible]यते। ॥३५॥
यस्याग्निहोत्रे विच्छिन्ने अन्तराव्रावति। रुद्रः खलु वास्तोष्पः।
यदग्निः। यज्ञमन्वत्या वर्त्तेयेत्। रुद्राय पशून् पिंदद्यात्। अप

पशूयजमानस्याद्। यद्पोऽन्वभिषिंचेत्। अनाद्यमग्नेरापः। अना
द्यमान्यामपि दध्यात्। गार्हपत्याद्भस्माहाय। इदं विष्णुर्विचक्रम इ
ति वैष्णव्यर्चाहवनीयाद्भस्म संपन्नुद्रवेत्। यज्ञो वै विष्णुः। यज्ञे
नैव यज्ञँ संतनोति। भस्मना पदमपि वपति ज्ञात्यै॥६॥ वैदेव्यां
दिति मुंचति सृजति करोति करोत्यान्यामपि दध्यात् मंत्रवच॥३॥
निवाए तस्याहवनीयो गार्हपत्यं कामयते। निगार्हपत्यजाहव
नीयम्। यस्याग्निमनुद्धृतँ सूर्योऽभिनिम्रोचति। दर्भेण हिरण्यं
प्रबध्य पुरस्ताद्धरेत्। अथाग्निं। अथाग्निहोत्रं। यद्धिरण्यं पु
रस्ताद्धरति। ज्योतिर्वै हिरण्यं। ज्योतिरेवैनं पश्यन्नुद्धरति।

Indira Gandhi National
Centre for the Arts

॥३८॥ यदग्निं पूर्वं हरत्यथाग्निहोत्रम्॥१॥ भागधेयेनैवैनं प्रीणाति
।ब्राह्मण आर्षेयमुद्धरेत्। ब्राह्मणो वै सर्वा देवताः। सर्वाभि
रेवैनं देवताभिरुद्धरति। अग्निहोत्रमुपसाद्यातमितो
रासीत। व्रतमेव हतमनुम्रियते। अन्तं वा एष आत्मनो गच्छति।
यस्तामयति। अन्तमेव यज्ञस्य गच्छति। यस्याग्निमनुद्धृतं सूर्यो
ऽभिनिम्रोचति॥२॥ पुनः समन्यमुहाति। अन्तेनैवान्तं यज्ञस्य
निष्करोति। वरुणो वा एतस्य यज्ञं गृह्णाति। यस्याग्निमनु ॥३६॥
द्धृतं सूर्योऽभिनिम्रोचति। वारुणं चरुं निर्वपेत्। तेनैव
यज्ञं निष्क्रीणीते। नि वा एतस्याहवनीयो गार्हपत्यं कामयते।

नि गार्हपत्य आहवनीयं। यस्याग्निमनुद्धृतं सूर्योऽभ्युदेति। च
तुर्गृहीतमाज्यं पुरस्ताद्धरेत्॥३॥ अथाग्निं। अथाग्निहोत्रं।
यदाज्यं पुरस्ताद्धरति। एतद्वा अग्नेः प्रियं धाम। यदाज्यं। प्रियै
णैवैनं धाम्ना समर्धयति। यदग्निं पूर्वं हरत्यथाग्निहोत्रं। भा
गधेयेनैवैनं प्रीणयति। ब्राह्मण आर्षेयमुद्धरेत्। ब्राह्म
णो वै सर्वा देवताः॥४॥ सर्वाभिरेवैनं देवताभिरुद्धरति।
पराची वा एतस्मै व्युच्छन्ती व्युच्छति। यस्याग्निमनुद्धृतं सूर्योऽभ्यु
देति। उषाः केतुना जुषतां। यज्ञं देवेभिरिन्वितं। देवेभ्यो मधुमत्त
मं स्वाहेति प्रत्यङ्ङ्निषद्याज्येन जुहुयात्। प्रतीचीमेवास्मै वि

Indira Gandhi National
Centre for the Arts

॥३७॥ वासयति। अग्निहोत्रमुपसाद्यातमितोरासीत। व्रतमेव हुत[illegible]
क्रियते। अंतं वा एष आत्मनो गच्छति ॥५॥ यः स्वप्स्यति। अंतमेव यज्ञ
स्य गच्छति। यस्याग्निमनुद्धृतं सूर्योऽभ्युदेति। पुनः समन्यज्ञ होदि
अंतेनैवांतं यज्ञस्य निष्करोति। मित्रो वा एष तस्य यज्ञं [illegible]ति। य
स्याग्निमनुद्धृतं सूर्योऽभ्युदेति। मैत्रं चरुं निर्वपेत्। तेनैव य
ज्ञं निष्क्रीणीते। यस्याहवनीयेऽनुद्धाते गार्हपत्य उद्वायेत् ॥६॥ ॥३७॥
यदाहवनीयमनुद्धाप्य गार्हपत्यं मंथेत्। विछिंद्यात्। भ्रातृव्य
मस्मै जनयेत्। यद्वै यज्ञस्य वास्तव्यं क्रियते। तदनु रुद्रोऽवक
रति। यत्पूर्वं मन्थवस्येत्। वास्तव्यमग्निमुपासीत। रुद्रोऽस्य पशून्घा लुक स्यात्

उद्धाहवनीयमुद्धाप्य। गार्हपत्यं मंथेत् ॥७॥ इतः प्रथमं जज्ञे अग्निः। स्वाद्यो
नेरधिजातवेदाः। स गायत्रिया त्रिष्टुभा जगत्या। देवेभ्यो हव्यं वह
तु प्रजानन्निति। छंदोभिरेवैनं स्वाद्योनेः प्रजनयति। गार्हपत्ये
मंथति। गार्हपत्यं वा अन्वाहिताग्नेः पशव उपतिष्ठंते। स यदुद्धा
पयति। तदनु पशवोपक्रामंति। इषे रय्यै रमस्व ॥८॥ सहसे द्युम्ना
य। ऊर्जे पत्यायेत्यायेत्याह। पशवो वै रयिः। पशूनेवास्मै रमय
ति। सारस्वतौ त्वोत्सौ समिंधातामित्याह। ऋक्सामे वै सारस्वतावु
त्सौ। ऋक्सामाभ्यामेवैनं समिंधे। सम्राडसि विराडसीत्याह।
रथंतरं वै सम्राट्। बृहद्विराट् ॥९॥ ताभ्यामेवैनं समिंधे। वज्रो
वै चक्रं। वज्रो वा एष तस्य यज्ञं विछिनत्ति। यस्यानो वा रथो वांतराग्नी याति।

Indira Gandhi National Centre for the Arts

॥३८॥ आहवनीयमुद्द्राव्य । गार्हपत्यादुद्धरेत् । यदग्ने पूर्वं प्रहितं पदं
ते । सूर्यस्य रश्मीनन्वाततान । तत्र रयिष्ठामनु संभरेतं । संनः
सृज सुमत्या वाजवत्येति ॥१०॥ पूर्वेणैवास्य यज्ञेन यज्ञमनु सं
तनोति । त्वमग्ने सप्रथा असीत्याह । अग्निः सर्वा देवताः । देवता
भिरेव यज्ञं संतनोति । अग्नये पथिकृते पुरोडाशमष्टाकपा
लं निर्वपेत् । अग्निमेव पथिकृतं स्वेन भागधेयेनोपधावति
। स एवैनं यज्ञियं पन्थामपिनयति । अनड्वान्दक्षिणा । वही ह्ये
ष समृद्ध्यै ॥११॥ हरत्यग्निहोत्रं निर्मोचति हरे देवता
गच्छत्युद्धायेन्मध्ये द्रमस्वब्रह हिराहि तिन वच ॥५॥ निवेद ॥३८॥
र्वत्विति निर्मोचति दर्भेण हिरण्यमग्निहोत्रं पुनर्वरुणेनिवा

रुणं निबाध तस्मान्नुदेति चतुर्गृहीतमाज्यं यदाज्यं पराच्युषाः
पुनर्मित्रो मैत्रं यस्याहवनीयेऽनुद्धाते गार्हपत्ये यद्वै ॥७॥ यस्य
प्रातःसवने सोमोऽतिरिच्यते । माध्यंदिनं सवनं कामयमानो
ऽभ्यतिरिच्यते । गौर्धयति मरुतामिति च यद्वतीषु कुर्वन्ति । हि
नस्ति वै संच्यवीतं । संच्यवः खलु वा एतत् । यत्सवनस्यातिरि
च्यते । यद्वद्वतीषु कुर्वन्ति । संच्येः शान्त्यै । गायत्रं सामन्नवति
पंचदशस्तोमः । तेनैव प्रातःसवनं नयन्ति ॥१॥ मरुत्वतीषु कुर्वन्ति ।
तेनैव माध्यंदिनात्सवनान्नयन्ति । होतुश्चमसमनुन्नयन्ते ।
होतानुशंसति । मध्यत एव यज्ञं समादधाति । यस्य माध्य

Indira Gandhi National Centre for the Arts

दिनेसवनेसोमोतिरिच्यते।आदित्यंतृतीयसवनंकामयमानो
॥२७॥ न्यतिरिच्यते।गौरिवीतंसामभवति।अतिरिक्तंवैगौरिवी
तम्।अतिरिक्तंयत्सवनस्यातिरिच्यते॥२॥अतिरिक्तस्यशांत्यै
।बण्महाँअसिसूर्येतिकुर्वंति।यस्यैवादित्यस्यसवनस्यका
मेनातिरिच्यते।तेनैवेनंकामेनसमर्द्धयति।गौरिवीतंसाम
भवति।तेनैवमाध्यंदिनात्सवनान्नयंति।सप्तदशस्तोमः।तेनै
वतृतीयसवनान्नयंति।होतुश्चमसमनून्नयंते।होतानुशंसति
॥३॥मध्यतएवयज्ञंसमादधाति।यस्यतृतीयसवनेसोमोतिरिच्ये ॥२७॥
त।उक्थ्यंकुर्वीत।यस्योक्थ्येतिरिच्येत।अतिरात्रंकुर्वीत।यस्याति
रात्रेतिरिच्यतेतत्वैदुष्प्रज्ञानं।यजमानंवाएतत्पशवआसाद्ययंति।

बृहत्सामभवति।बृहद्वाइमांल्लोकान्दाधार।बार्हताःपशवः।बृहतैवा
स्मैपशून्दाधार।शिपिविष्टवतीषुकुर्वंति।शिपिविष्टोवैदेवानांपुष्ट
म्।पुष्टैवैनंसमर्द्धयति।होतुश्चमसमनून्नयंते।होतानुशंस
ति।मध्यतएवयज्ञंसमादधाति॥४॥यत्तिसवनस्यातिरिच्यतेशं
सतिशंसाशत्रोच॥५॥एकैकोवैजनतायामिंद्रः।एकंवाएतावि
न्द्रमभिसंसुन्वतः।यौद्वौसंसुन्वतः।प्रजापतिर्वाएषवितायते।य
द्यज्ञः।तस्यराध्वाणोदंताः।अन्यतरंवाएतेसंसुन्वतोनिर्वसंति
।पूर्वेणोपसृत्यादेवताइत्याहुः।पूर्वोपसृतस्यवैश्रेयान्भवति।पू
र्वंत्वाज्योनिमंवत्यभिजित्यै॥६॥मरुत्वतीःप्रतिपदः।मरुतोवैदेवानां
मपराजितमायतनं।देवानामेवापराजितमायतनेयजते।अ

Indira Gandhi National
Centre for the Arts

॥४०॥ बृहद्रथंतरे भवतः। इयं वाव रथंतरम्। असौ बृहत्। आभ्यामे
वैनमंतरेति। वाचश्च मनसश्च। प्राणाच्चापानाच्च। दिवश्च पृथिव्या
श्च॥२॥ सर्वस्माद्वित्ताद्वेद्यात्। अभिवर्तो ब्रह्मसाम भवति। सुवर्गस्य
लोकस्याभिवृत्त्यै। अभिजिद्भवति। सुवर्गस्य लोकस्याभिजित्यै। वि
श्वजिद्भवति। विश्वस्य जित्यै। यस्यान्नयाय्यं सोमयज्ञक्रतव इत्याहुः
।सदेवतावद्भूय इति। यद्यग्निष्टोमः सोमः परस्तात्स्यात्॥३॥ उक्थ्यं
कुर्वीत। यद्युक्थ्यः स्यात्। अतिरात्रं कुर्वीत। यज्ञक्रतुभिरेवास्य दे ॥४०॥
वतावद्भे। यो वै छंदोभिरभिभवति। स स्वं स्तुन्वतोरभिभवति। संवे
शायत्वोपवेशायत्वेत्याह। छंदांसि वै संवेशाउपवेशाः। छंदोभिरेवा
स्य छंदांस्यभिभवति। इष्टर्गो वा एष छिद्रमध्वर्युः॥४॥ इष्टर्गः खलु वै

ष वैर्तुः क्षीयते। प्राणापानौ मृत्योर्मा पातमित्याह। प्राणापानयोरे
वाश्रयते। प्राणापानौ मा मा हासिष्टमित्याह। नैनं पुरायुषः प्राणापा
नौ जहितः। आर्तिं वा एते निर्यंति। एषां दीक्षितानां प्रमीयते। तं य
दवर्जेयुः। क्रूरकृतमिवैषां लोकस्यात्। आहरदहेति ब्रूयात्।
॥५॥ तं दक्षिणतो वेद्यै निधाय। सर्पराज्ञ्या ऋग्भिः स्तुयुः। इ
यं वै सर्पतो राज्ञी। अस्या एवैनं परिददति। व्यृद्धं तदित्याहुः
यत्स्तुतमननुशस्तमिति। होता प्रथमः प्राचीनावीती मार्जालीयं परी
यात्। याम्यां स्तु गायन्। सर्पराज्ञीनां कीर्तयेत्। उभयोरेवैनं लो
कयोः परिददति॥६॥ अथो खल्वेवं त्वेवैनं। अथो न्येवास्मिन्नुह्वते। त्रिः
परियंति। त्रय इमे लोकाः। एभ्य एवैनं लोकेभ्यो ह्नुवते। त्रिः पुनः

Indira Gandhi National
Centre for the Arts

॥४१॥ परियंति। बहु संपद्यते। षड्वा ऋतवः। ऋतुभिरेवैनं छुवते। अग्न
ज्याधेयं त्रिपवस्ई ति प्रतिपदं कुर्वीरंन्। रथंतरं सामैषाऽं स्तो
मस्या व। आयुरे वास्मिं दधते। अथो पाप्मानमेव विजहतो यंति
॥७॥ अग्निं जित्यै इथि व्या श्चस्यादव्यर्द्धुर्या लोकयोः परि द द ति कु
र्वीरं स्त्रीणि च॥८॥ ऋतुर्यैवा एतस्माद पक्रामत्। यशो वो वीर्यमप
क्रामंति। यस्याद्यपो विरोहति। त्वाष्ट्रं बहुरूपमालभेत। त्वष्टा वै रू
पाणामीशे। य एव रूपाणामीशे। सोऽस्मिन्यशः वीर्यं यच्छति। नास्माद्य
शो वीर्यमपक्रामंति। आर्तिं वा एते नियंति। येषां दीक्षितानामग्नि ॥४१॥
रुद्वायति॥९॥ यदाहवनीय उद्वायेत्। यत्तं मंथेत्। विछिंद्याद्
भ्रातृव्यमस्मै जनयेत्। यदाहवनीय उद्वायेत्। आग्नीध्रादुद्धरेत्।

यदाग्नीध्र उद्वायेत्। गार्हपत्यादुद्धरेत्। यद्गार्हपत्य उद्वायेत्। अत एव
पुनर्मंथेत्॥२॥ अत्र वाव स निलयते। यत्र खलु वै निलीनमुत्तमं पश्यं
ति। तदेनमिच्छंति। यस्माद्ध्येष उद्वायेत्। तस्मादरणी कुर्यात्। क्रमुकमपि कु
र्वीत। एषा वा अग्नेः प्रिया तनूः। यत्क्रमुकः। प्रिययैवैनं तनुवा समर्धयति
। गार्हपत्यमथ्यति॥३॥ गार्हपत्यो वा अग्नेर्योनिः। स्वादेवैनं योनेर्जनयति
। नास्मै भ्रातृव्यं जनयति। यस्य सोम उपदस्येत्। सुवर्णं हिरण्यं द्वेधा
विछिंद्य। ऋजीषे अन्यदाधुनुयात्। जुहुयादन्यत्। सोममेवाभिषुणोति।
सोमं जुहोति। सोमस्य वा अभिषूयमाणस्य प्रिया तनूरुदक्रामत्॥४॥ तत्
सुवर्णं हिरण्यमभवत्। यत्सुवर्णं हिरण्यं कुर्वंति। प्रिययैवैनं त
नुवा समर्धयंति। यस्य क्रीतं सोममपहरेयुः। क्रीणीयादेवैव

Indira Gandhi National
Centre for the Arts

ततः प्रायश्चित्तिः। यस्य क्रीतमपहरेयुः। आदारांश्च फाल्गुनानि चाभिषु
॥५२॥ णुयात्। गायत्री यं सोममाहरत्। तस्य योंऽशुः परापतत्॥५॥ त आदा
रा अभवन्। इन्द्रो वृत्रमहन्। तस्य वल्कः परापतत्। तानि फाल्गुनान्य
भवन्। पशवो वै फाल्गुनानि। पशवः सोमो राजा। यदादारांश्च
फाल्गुनानि चाभिषुणोति। सोममेव राजानमभिषुणोति। एते
न प्रातःसवने श्रीणीयात्। दध्ना माध्यंदिने॥६॥ नीतमिश्रेण तृती
यसवने। अग्निष्टोमः सोमः स्याद्रथंतरसामा। य एवर्त्विजो वृतास्युः।
त एनं याजयेयुः। एकां गां दक्षिणां दद्यात्तेभ्य एव। पुनः सोमं ॥५२॥
क्रीणीयात्। यज्ञेनैव तद्यज्ञमिच्छति। सैव ततः प्रायश्चित्तिः। सर्वाभ्यो
वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानमागुरते। यः सत्रायागुरते।

एतावान्खलु वै पुरुषः। यावदस्य वित्तं। सर्ववेदसेन यजेत। सर्वपृ
ष्ठोऽस्य सोमः स्यात्। सर्वाभ्य एव देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मा
नं निष्क्रीणीते॥७॥ उद्वायति मंथेन्मंथत्वक्रामत्तरापतन्माध्यंदि
नमागुरते पंचचा॥७॥ पवमानः सुवर्जनः। पवित्रेण विचर्षणिः।
यः पोता स पुनातु मा। पुनंतु मा देवजनाः। पुनंतु मनवो धिया। पु
नंतु विश्व आयवः। जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा। शु
क्रेण देव दीद्यत्। अग्ने क्रत्वा क्रतूँ रनु॥१॥ यत्ते पवित्रमर्चिषि। अग्
ने विततमन्तरा। ब्रह्म तेन पुनीमहे। उभाभ्यां देव सवितः। पवित्रे
ण सवेन च। इदं ब्रह्म पुनीमहे। वैश्वदेवी पुनती देव्यागात्। यस्यै
बह्वीस्तन्वो वीतपृष्ठाः। तया मदंतः सधमाद्येषु। वयं स्याम पत

Indira Gandhi National Centre for the Arts

॥४३॥ चोरयीणां॥२॥वैश्वानरोरश्मिभिर्मापुनातु।वातःप्राणेनेषिरोमयो
भूः।द्यावापृथिवीपयसापयोभिः।ऋतावरीयज्ञियेमापुनीतां॥
बृहद्भिःसवितस्तृभिः।वर्षिष्ठैर्देवमन्मभिः।अग्नेदक्षैःपुनाहिमा।
येनदेवाअपुनता।येनापोदिव्यंकशः।तेनदिव्येनब्रह्मणा॥३॥
इदंब्रह्मपुनीमहे।यःपावमानीरध्येति।ऋषिभिःसंभृतंरसं
।सर्वंसपूतमश्नाति।स्वदितंमातरिश्वना।पावमानीर्योअध्ये
ति।ऋषिभिःसंभृतंरसं।तस्मैसरस्वतीदुहे।क्षीरंसर्पिर्म ॥४३॥
धूदकं।पावमानीस्वस्त्ययनीः॥४॥सुदुघाहिपयस्वतीः।ऋषि
भिःसंभृतोरसः।ब्राह्मणेष्वमृतंहितं।पावमानीर्दिशंतुनः।
इमंलोकमथोअमुं।कामान्समर्धयंतुनः।देवीर्देवैःसमाभृताः।

पावमानीस्वस्त्ययनीः।सुदुघाहिघृतश्चुतः।ऋषिभिःसंभृतोरसः।
॥५॥ब्राह्मणेष्वमृतंहितं।येनदेवाःपवित्रेण।आत्मानंपुनते
सदा।तेनसहस्रधारेण।पावमान्यःपुनंतुमा।प्राजापत्यंप
वित्रं।शतोद्यामंहिरण्मयं।तेनब्रह्मविदोवयं।पूतंब्रह्मपुनी
महे।इंद्रःसुनीतीसहमापुनातु।सोमःस्वस्त्यावरुणःसमीच्या।
यमोराजाप्रमृणाभिःपुनातुमा।जातवेदामोर्जयंत्यापुनातु॥
ऊतुरयीणांब्रह्मणास्वस्त्ययनीःसुदुघाहिघृतश्चुतऋषिभिः
संभृतोरसःपुनातुत्रीणिच॥८॥प्रजावैसत्रमासततपस्तप्यमाना
अजुह्वतीः।देवाउपदर्श्यचमसंघृतस्यपूर्णंस्वधां।तमुपोहतिष्ठं
तमभुहतुः।तेनार्धमाससऊर्जमवारुंधत।तस्मादर्धमासेदेवा

Indira Gandhi National Centre for the Arts

पितरोपरंयंच मसंछ तस्य पूर्णं स्वधां। तमुपोदतिष्ठंत मनुष्या ह
तेन मासस्यूर्ज्जमवारुंधत। तस्मान्मासि पितृभ्यः क्रियते। मनुष्या अ
परंयंच मसंछ तस्य पूर्णं स्वधां॥१॥ तमुपोदतिष्ठंत मनुष्या ह
वुः। तेनाह्न ईमूर्ज्जमवारुंधत। तस्माद्दिरह्नो मनुष्येभ्य उपह्रि
यते। प्रातश्च सायंच। पशवो परंयंच मसंछ तस्य पूर्णं स्वधां।
तमुपोदतिष्ठंत मनुष्या हवुः। तेनत्रयीमूर्ज्जमवारुंधत। तस्मात्रि
रह्नः पशवः प्रेरते। प्रातः संगवे सायं। असुरा अपरंयंच मसंछ ॥४४॥
तस्य पूर्णं स्वधां॥२॥ तमुपोदतिष्ठंत मनुष्या हवुः। तेन संवत्स
रऊर्ज्जमवारुंधत। ते देवा अमन्यंत। अमी वा इदमभूवन्।
यद्वयं स्म इति। त एतानि चातुर्मास्यान्यपश्यन्। तानि निरवपन्।

तैरेवैषां तामूर्ज्जमवृंजत। ततो देवा अभवन्। परासुराः॥३॥ य एवं
ते। यामेव देवा ऊर्ज्जमवारुंधत। तां तेनाव रुंधे। यत्पितृभ्यः करोति।
यामेव पितर ऊर्ज्जमवारुंधत। तां तेनाव रुंधे। यदावसथेन हं
हरंति। यामेव मनुष्या ऊर्ज्जमवारुंधत। तां तेनाव रुंधे। यद्दक्षि
णां ददाति॥४॥ यामेव पशव ऊर्ज्जमवारुंधत। तां तेनाव रुंधे। यच्चा
तुर्मास्यैर्यजते। यामेवासुरा ऊर्ज्जमवारुंधत। तां तेनाव रुंधे। भव
त्यात्मना। परास्य भ्रातृव्यो भवति। विराजो वा एषा विक्रांतिः। य
च्चातुर्मास्यानि। वैश्वदेवेनास्मिंल्लोके प्रत्यतिष्ठत्॥५॥ वरुण
प्रघासैरंतरिक्षे। साकमेधैरमुष्मिंल्लोके। एष ह त्वा वै तत्सर्वं
वति। य एवं विद्वांश्चातुर्मास्यैर्यजते॥ मनुष्या अपरंयंच म

Indira Gandhi National Centre for the Arts

॥४५॥ संचतस्य पर्णं स्वयोव्यामस्तु राज्यपथ्यं च म संचतस्य पर्णं स्वव्या
मस्तु राददात्यति ४ चत्वारि च ॥७॥ अग्निर्वाव संवत्सरः । आदित्यः
परिवत्सरः । चंद्रमा इदावत्सरः । वायुरनुवत्सरः । यद्वैश्वदेवेन
यजते । अग्निमेव तत्संवत्सरमाप्नोति । तस्माद्वैश्वदेवेन यज
मानः । संवत्सरीणां स्वस्तिमाशास्त इत्याशासीत । यद्वरुणप्र
घासैर्यजते । आदित्यमेव तत्परिवत्सरमाप्नोति ॥१॥ तस्माद्व
रुणप्रघासैर्यजमानः । परिवत्सरीणां स्वस्तिमाशास्त इत्याशा
सीत । यत्साकमेधैर्यजते । चंद्रमसमेव तदिदावत्सरमाप्नोति ।
तस्मात्साकमेधैर्यजमानः । इदावत्सरीणां स्वस्तिमाशास्त इत्या ॥४५॥
शासीत । यत्पितृयज्ञेन यजते । देवानेव तदन्ववस्यति । अथवा

अग्न्यावायुश्चानुवत्सरश्च । त्रीतावुच्छिद्येते । यच्छुनासीरीयेण यजते
॥२॥ वायुमेव तदनुवत्सरमाप्नोति । तस्माच्छुनासीरीयेण यजमानः ।
अनुवत्सरीणां स्वस्तिमाशास्त इत्याशासीत । संवत्सरं वा एष ईप्स
तीत्याहुः । यश्चातुर्मास्यैर्यजत इति । एष ह त्वेव संवत्सरमाप्नोति । य
एवं विद्वांश्चातुर्मास्यैर्यजते । विश्वे देवाः समयजंत । तेऽग्निमेवा
यजंत । त एतं लोकमजयन् ॥३॥ यस्मिन्नग्निः । यद्वैश्वदेवेन य
जते । एतमेव लोकं जयति । यस्मिन्नग्निः । अग्नेरेव सायुज्यमुपैति ।
यदा वैश्वदेवेन यजते । अथ संवत्सरस्य गृहपतिमाप्नोति । य
दा संवत्सरस्य गृहपतिमाप्नोति । अथ सहस्रयाजिनमाप्नोति
यदा सहस्रयाजिनमाप्नोति ॥४॥ अथ गृहमेधिनमाप्नोति ।

Indira Gandhi National
Centre for the Arts

यदागृहमेव्विनमाप्नोति। अथाग्निर्न्नवति। यदाग्निर्न्नवति। अ
॥४६॥ यगौर्न्नवति। एषावैवेश्वस्यमात्रा। एतद्वाएतेषामवम्। अ
तोतोवउत्तराणिश्रेयाँसिन्नवंति। यद्विश्वेदेवासमयजंता। तद्वै
श्वदेवस्यवैश्वदेवत्वम्॥५॥ अथादित्योवरुणँराजानंवरुणप्र
घासैरयजत। सएतंलोकमजयत्। यस्मिन्नादित्याः। यद्वरुण
प्रघासैर्यजते। एतमेवलोकंजयति। यस्मिन्नादित्याः। आदित्यस्यै
वसायुज्यमुपैति। यदादित्योवरुणँराजानंवरुणप्रघासैर
यजत। तद्वरुणप्रघासानांवरुणप्रघासत्वं। अथसोमोराजाछं ॥४६॥
दाँसिसाकमेधैरयजत॥६॥ सएतंलोकमजयत्। यस्मिँश्च
द्रमाविभाति। यत्साकमेधैर्यजते। एतमेवलोकंजयति। यस्मि
ँश्चंद्रमाविभाति। चंद्रमसएवसायुज्यमुपैति। सोमोवैचंद्रमाः।

एषहत्वैसाक्षात्सोमंभक्षयति। यएवंविद्वान्साकमेधैर्यजते। यत्सोमश्छं
राजाछंदाँसिचसमैधंत॥७॥ तत्साकमेधानाँसाकमेधत्वम्। अथ
र्त्तवःपितरःप्रजापतिंपितरंपितृयज्ञेनायजंत। तएतंलोकमजय
न्। यस्मिन्नृतवः। यत्पितृयज्ञेनयजते। एतमेवलोकंजयति। यस्मि
न्नृतवः। ऋतूनामेवसायुज्यमुपैति। यदृतवःपितरःप्रजापतिंपितरं
पितृयज्ञेनायजंत। तत्पितृयज्ञस्यपितृयज्ञत्वम्॥८॥ अथोषधयइ
मंदेवंत्र्यंबकैरयजंत। प्रतेमहीति। ततोवैताअप्रथंत। यएवंविद्वा
ँस्त्र्यंबकैर्यजते। प्रथतेप्रजयापशुभिः। अथवायुःपरमेष्ठिनँशु
नासीरीयेणायजत। सएतंलोकमजयत्। यस्मिन्वायुः। यच्छुनासी
रीयेणयजते। एतमेवलोकंजयति। यस्मिन्वायुः॥९॥ वायोरेवसायु
ज्यमुपैति। ब्रह्मवादिनोवदंति। प्रचालुर्मास्ययाजीमीयतां२नप्रमीयता। ३

इति। जीवन्वा एष ऋतूनप्येति। यदि वसंता प्रमीयते। वसंतो भवति।
॥४७॥ यदि ग्रीष्मे ग्रीष्मः। यदि वर्षासु वर्षाः। यदि शरदि शरत्। यदि हेमन्ते
मंतुः। ऋतुभ्यो त्वा संवत्सरमप्येति। संवत्सरः प्रजापतिः। प्रजापति
र्वावैषः॥१०॥ परिवत्सरमाप्नोति। शुनासीरीयेण यजते। यज्ञहस्त
पाजिनमाप्नोति वैश्वदेवत्वं लोकमेवैरयजंत समेधंत पि
त्र यज्ञत्वं जयति यस्मिन्वायुं में तस्त्रीणि च॥१०॥ उत्तरो यो ऋवं
सुराममुदस्थाग्निर्वै यस्य प्रातःसवन एकैकोस्तु यै पवमानैः ॥४७॥
ऋजावै सत्रमासताग्निर्वा वसंतहसरो दश॥ उत्ये वा उदस्था
स्वर्वाज्जिर्मध्यतोत्रवाव ब्राह्मणे एषयमहमेवियेनर्द्धं मरूवहिः॥४॥
॥श्री॥ हरिहि ॐ नमः॥ अग्नेः कृत्तिकाः। शुक्रं परस्ताज्ज्योतिरवस्तात्। प्र
जापतेरोहिणी। आपः परस्तादोषधयो वस्तात्। सोमस्येन्वका विततानि।

परस्ताद्धयंतोवस्तात्। रुद्रस्य बाहू। मृगयवः परस्ताद्विक्षारोव
स्तात्। अदित्यै पुनर्वसू। वातः परस्तादार्द्रमवस्तात्॥१॥ बृहस्पतेस्तिष्यः।
जुह्वतः परस्ताद्यजमाना अवस्तात्। सर्पाणामाश्रेषाः। अभ्याग
च्छंत परस्तादभ्यानृत्यंतो वस्तात्। पितॄणां मघाः। रुदंतः पर
स्तादपभ्रंशो वस्तात्। अर्यम्णः पूर्वे फल्गुनी। जाया परस्तादृ
षभो वस्तात्। भगस्योत्तरे। वहतवः परस्ताद्वहमाना अवस्तात्।
॥२॥ देवस्य सवितुर्हस्तः। प्रसवः परस्तात्सनिरवस्तात्। इंद्रस्य चि
त्रा। ऋतं परस्तात्सत्यमवस्तात्। वायोर्निष्ट्या व्रततिः परस्ताद
सिद्धिरवस्तात्। इंद्राग्नियोर्विशाखे। युगानि परस्तात्कृषमाणा
अवस्तात्। मित्रस्यानूराधाः। अभ्यारोहत्परस्तादभ्यारूढमव
स्तात्॥३॥ इंद्रस्य रोहिणी। शृणत्परस्तात्प्रतिशृणदवस्तात्। निर्ऋ

Indira Gandhi National
Centre for the Arts

त्ये मूलबर्हणी। प्रतिभंजंतः परस्तात्प्रतिशृण्वंतोवस्तात्। अपां पू
॥४८॥ र्वाअषाढाः। वर्चः परस्तात्समितिरवस्तात्। विश्वे देवा
उत्तराः। अभिजयत्परस्तादभिजितमवस्तात्। विष्णोः श्रोणा पृ
च्छमानाः। परस्तात्पंथा अवस्तात्॥४॥ वसूनां श्रविष्ठाः। भूतं
परस्ताद्भूतिरवस्तात्। इंद्रस्य शतभिषक्। विश्वव्यचाः परस्ता
द्विश्वक्षितिरवस्तात्। अजस्यैकपदः पूर्वे प्रोष्ठपदाः। वैश्वानरं
परस्ताद्वैश्वावसवमवस्तात्। अहेर्बुध्नियस्योत्तरे। अभिषिंचंतः
परस्तादभिषुण्वंतोवस्तात्। पूष्णो रेवती। गावः परस्ताद्वत्सा अ
वस्तात्। अश्विनोरश्वयुजौ। ग्रामः परस्तात्सेनावस्तात्। यमस्या
पभरणीः। अपकर्षंतः परस्तादपवहंतोवस्तात्। पूर्णा पश्चाद्यत्ते ॥४८॥
देवा अदधुः॥५॥ आर्द्रमवस्ताद्धहमानाअवस्तात्दन्याकृष्टमवस्ता

त्पंथा अवस्ताद्भूसा अवस्तात्पंचचा॥१ यत्पुण्यं नक्षत्रं। तद्बट्कुर्वीतोपव्यु
षं। यदा वै सूर्य उदेति। अथ नक्षत्रं नैति। यावति तत्र सूर्यो गच्छेत्।
यत्र जघन्यं पश्येत्। तावति कुर्वीत यत्कारी स्यात्। पुण्याह एव कु
रुते। एवं ह वै यज्ञेषुं च शतद्युम्नं च मात्स्यो निरवसाययांच
कार॥१॥ यो वै नक्षत्रियं प्रजापतिं वेद। उभयोरेनं लोकयोर्विदुः। हस्त
एवास्य हस्तः। चित्रा शिरः। निष्ट्या हृदयं। ऊरू विशाखे। प्रतिष्ठानूरा
धाः। एष वै नक्षत्रियः प्रजापतिः। य एवं वेद। उभयोरेनं लोकयोर्वि
दुः॥२॥ अस्मिंश्च अमुष्मिंश्च। यां कामयेत दुहितरं प्रियास्यादिति।
तां निष्ट्यायां दद्यात्। प्रियैव भवति। नैव तु पुनरागच्छति। अभिजि
न्नाम नक्षत्रं। उपरिष्टादषाढानां। अवस्तात्श्रोणायै। देवासुराः सं
यत्ता आसन्। ते देवास्तस्मिन्नक्षत्रेभ्यजयन्॥३॥ यदभ्यजयन्।

Indira Gandhi National Centre for the Arts

॥४७॥ तदजिजितोजिजिल्वं। यंकामयेत नभजप्यजयेदिति। तमेतस्मिन्नक्षत्रे
याजयेत्। अनपँग्यमेवजयति। पापँशीजितमिवनु। प्रजापतिः प
शूनसृजत। ते नक्षत्रंनक्षत्रमुपातिष्ठंत। ते समावंत एवाभव
न्। ते रेवतीमुपातिष्ठंत॥५॥ ते रेवत्यां प्राभवन्। तस्माद्रेवत्यां
पशूनांकुर्वीत। यत्किंचार्वाचीनꣳ सोमात्। प्रैव भवंति। सलिलं वा
इदमंतरासीत्। यदतरन्। तत्तारकाणां तारकात्वं। यो वा इह य
जते। अमुꣳ स लोकं नक्षते। तन्नक्षत्राणां नक्षत्रत्वं॥५॥ देवगृहा वै॥४७॥
नक्षत्राणि। य एवं वेद। गृह्येव भवति। यानि वा इमानि पृथिव्याः
च्चित्राणि। तानि नक्षत्राणि। तस्मादश्लीलनामꣳश्चित्रे। नावस्ये
न्न यजेत। यथा पापाहे कुरुते। तादृगेव तत्। देवनक्षत्राणि वा अन्यानि।

॥६॥ यमनक्षत्राण्यन्यानि। कृत्तिकाः प्रथमं। विशाखे उत्तमं। तानि देव
नक्षत्राणि। अनूराधाः प्रथमं। अपभरणीरुत्तमं। तानि यमनक्ष
त्राणि। यानि देवनक्षत्राणि। तानि दक्षिणेन परियंति। यानि
यमनक्षत्राणि॥७॥ तान्युत्तरेण। अन्वेषामराद्स्मेति। तदनूरा
धाः। ज्येष्ठमेषामवधिष्मेति। तज्ज्येष्ठघ्नी। मूलमेषामवृक्षामेति।
तन्मूलबर्हणी। यन्नासहंत। तदषाढाः। यदश्लोणत्॥८॥ तच्छ्रो
णा। यदशृणोत्। तच्छ्रविष्ठाः। यच्छतमभिषज्यन्। तच्छतभिष
क्। प्रोष्ठपदेषूदयच्छंत। रेवत्यामरवंत। अश्वयुजोरयुंज
त। अपभरणीष्वपावहन्। तानि वा एतानि यमनक्षत्राणि।
यान्येव देवनक्षत्राणि। तेषु कुर्वीत यत्कारी स्यात्। पुण्याह एव कुरुते

Indira Gandhi National
Centre for the Arts

॥५०॥ ॥७॥ चकारैवं वेदो म ययोरेनं लोकं यो विदुरजनयन्रेवती
मुपातिष्ठंतनक्षत्रलमन्यानि यानि यमनक्षत्राण्यश्लोणच्चमन
क्षत्राणि त्रीणि च ॥२॥ देवस्य सवितुः प्रातः प्रसवः प्राणः । वरुणस्य सा
यमासवोपानः । यत्प्रतीचीनं प्रातस्तनात् । प्राचीनँ संगवात् । ततो
देवा अग्निष्टोमं निरमिमत । तत्तदात्तवीर्यं निर्मार्गः । मित्रस्य संगवः ।
तत्पुण्यं तेजस्व्यहः । तस्मात्तर्हि पशवः समायंति । यत्प्रतीचीनँ संग
वात् ॥१॥ प्राचीनं मध्यंदिनात् । ततो देवा उक्थ्यं निरमिमीत । तत्तदा
त्तवीर्यं निर्मार्गः । बृहस्पतेर्मध्यंदिनः । तत्पुण्यं तेजस्व्यहः । तस्मात्त
र्हि तेक्ष्णिष्ठं तपति । यत्प्रतीचीनं मध्यंदिनात् । प्राचीनमपराह्णात् । ॥५१॥
ततो देवाः षोडशिनं निरमिमत । तत्तदात्तवीर्यं निर्मार्गः ॥२॥ भगस्या

पराह्णः । तत्पुण्यं तेजस्व्यहः । तस्मादपराह्णे कुमार्यो भगमिच्छमानाः
श्चरंति । यत्प्रतीचीनमपराह्णात् । प्राचीनँ सायात् । ततो देवा अतिरा
त्रं निरमिमत । तत्तदात्तवीर्यं निर्मार्गः । वरुणस्य सायं । तत्पुण्यं तेज
स्व्यहः । तस्मात्तर्हि नानृतं वदेत् ॥३॥ ब्राह्मणो वा अष्टाविँशो नक्ष
त्राणाम् । समानस्याह्नः पंच पुण्यानि नक्षत्राणि । चत्वार्यश्लीलानि । तानि
नव । यच्च परस्तान्नक्षत्राणाम् । यच्चावस्तात् । तान्येकादश । ब्राह्मणो द्वा
दशः । य एवं विद्वान्संवत्सरं व्रतं चरति । संवत्सरे सौवास्य व्रतं गुप्तम्भ
वति । समानस्याह्नः पंच पुण्यानि नक्षत्राणि । चत्वार्यश्लीलानि । तानि
नव । आग्नेयी रात्रिः । ऐंद्रमहः । तान्येकादश । आदित्यो द्वादशः । य ए
वं विद्वान्संवत्सरं व्रतं चरति । संवत्सरे ऐवास्य व्रतं गुप्तं भवति ॥४॥

Indira Gandhi National
Centre for the Arts

संगवात्षोडशिनंनिरमिमततत्तदात्तवीर्यंनिर्मार्गोवदेद्वतिस्म
५१॥ नस्यान्हः पंचपुण्यानिनक्षत्राण्येष्टोचा॥३॥ब्रह्मवादिनोवदंति
कतिपात्राणियज्ञंवहंतीति।त्रयोदशेतिब्रूयात्।सयद्ब्रूयात्।कस्ता
निरमिमीतेति।प्रजापतिरितिब्रूयात्।सयद्ब्रूयात्।कुतस्तानि
रमिमीतेति।आत्मनइति।प्राणापानाभ्यामेवोपांशुवतर्यामौनि
रमिमीत॥१॥व्यानादुपांशुसवनं।वाचऐंद्रवायवं।दक्षक्रतु
भ्यांमैत्रावरुणं।श्रोत्रादाश्विनं।चक्षुषःशुक्रामंथिनौ।आत्मनआ ॥५१॥
ग्रयणं।अंगेभ्यउक्थ्यं।आयुषोध्रुवं।प्रतिष्ठाया ऋतुपात्रे।य
त्रंवावतंप्रजापतिर्निरमिमीत।सनिर्मितोनाध्रियत।समव्ली
यत।सएतान्प्रजापतिरपिबापानपश्यत्।तान्निरवपत्।तैर्वै

सयज्ञमप्यवपत्।यदपिबापानवंति।यज्ञस्यधृत्याअसंव्ला
या॥२॥उपांशुवतर्यामौनिरमिमीतानिमीतषट्च॥४॥ऋतमेवप
रमेष्ठि।ऋतंनात्येतिकिंचन।ऋतेसमुद्रआहितः।ऋतेभूमिरि
यंश्रिता।अग्निस्तिग्मेनशोचिषा।तपक्राकांतमुष्णिहा।शिर सत्येनपरि
स्तपस्याहितं।वैश्वानरस्यतेजसा।ऋतेनास्यनिवर्त्तये॥१॥ वृत्तये
तपसास्यानुवर्त्तये।शिवेनास्योपवर्त्तये।शग्मेनास्याभिव
र्त्तये।तदृतंतत्सत्यं।तद्व्रतंतच्छकेयं।तेनशकेयंतेनराध्या
सं।यद्धर्मःपर्यवर्त्तयत्।अंतान्पृथिव्यादिवः।अग्निरीशा
नओजसा।वरुणोधीतिभिस्सह॥२॥इंद्रोमरुद्भिःसखिभिःसह।
अग्निस्तिग्मेनशोचिषा।तपक्राकांतमुष्णिहा।शिरस्तपस्याहितं।

वि० ... ३७०

Indira Gandhi National Centre for the Arts

वैश्वानरस्य तेजसा। ऋतेनास्य निवर्त्तये। सत्येन परिवर्त्तये।
॥५२॥ तपसास्यानुवर्त्तये। शिवेनास्योपवर्त्तये। शग्मेनास्याभि
वर्त्तये॥३॥ तद्दृतं तत्सत्यं। तद्व्रतं तच्छकेयं। तेन शकेयं तेन रा
ध्यासं। यो अस्याः पृथिव्यास्त्वचि। निवर्त्तयत्यो षधीः। अग्निरीशा
न ओजसा। वरुणो धीतिभिः सह। इन्द्रो मरुद्भिः सखिभिः सह। अ
ग्निस्तिग्मेन शोचिषा। तपत्राक्रीत मुष्किहा॥४॥ शिरस्तपस्याहि
तं। वैश्वानरस्य तेजसा। ऋतेनास्य निवर्त्तये। सत्येन परिवर्त्त
ये। तपसास्यानुवर्त्तये। शिवेनास्योपवर्त्तये। शग्मेनास्याभि
वर्त्तये। तद्दृतं तत्सत्यं। तद्व्रतं तच्छकेयं। तेन शकेयं तेन राध्या ॥५२॥
सं॥५॥ एकं मासमुदसृजत्। परमेष्ठी प्रजाभ्यः। तेनाभ्यो मह
आवहत्। अमृतं मर्त्याभ्यः। प्रजामनुप्रजायसे। तदु ते मर्त्यामृतं।

येन मासा अर्द्धमासाः। ऋतवः परिवत्सराः। येन ते ते प्रजापते। ई
जानस्य न्यवर्त्तयन्॥६॥ तेनाहमस्य ब्रह्मणा। निवर्त्तयामि जीवसे।
अग्निस्तिग्मेन शोचिषा। तपत्राक्रीत मुष्किहा। शिरस्तपस्याहितं।
वैश्वानरस्य तेजसा। ऋतेनास्य निवर्त्तये। सत्येन परिवर्त्तये।
तपसास्यानुवर्त्तये। शिवेनास्योपवर्त्तये। शग्मेनास्याभिवर्त्तये।
तद्दृतं तत्सत्यं। तद्व्रतं तच्छकेयं। तेन शकेयं तेन राध्यासं॥७॥
परिवर्त्तये सह। अभिवर्त्तय उष्किहा। राध्यासं न्यवर्त्तयन्नुपवर्त्तये
चत्वारि च॥५॥ देवा वै यद्यज्ञेऽकुर्वत। तदसुरा अकुर्वत। ते सुरा
ऊर्ध्वं पृष्ठेभ्यो नापश्यन्। ते केशानग्रेऽवपन्त। अथ श्मश्रूणि। अथो
पोपपक्षौ। ततस्ते वाञ्चञ्जायन्त। पराभवन्। यस्यैवं वपन्ति।
आवाऽऽइति॥१॥ अथोपरैवमवति। अथ देवा ऊर्ध्वं पृष्ठेभ्यो

Indira Gandhi National
Centre for the Arts

स्यन्। तउपपक्षावशीर्येते। अथश्मश्रूणि। अथकेशान्। ततस्ते
अभवन्। सुवर्गंलोकमायन्। यस्यैवंवपंति। भवत्यात्मना। अ
॥५३॥ थोसुवर्गंलोकमेति॥२॥ अथैतन्मनुर्वप्त्रेमिथुनमपश्यत्॥
सश्मश्रूण्येवाग्रेऽवपत। अथोपपक्षौ। अथकेशान्। ततोवैस
प्राजायतप्रजयापशुभिः। यस्यैवंवपंति। प्रप्रजयापशुभिर्मि
थुनैर्जायते। देवासुराःसंयत्ताआसन्। तेसंवत्सरेव्यायच्छं
त। तान्देवाश्चातुर्मास्यैरेवाभिप्रायुंजत॥३॥ वैश्वदेवेन ॥५३॥
चतुरोमासोवृंजतेंद्रराजानः। तान्छीर्षन्निचावर्त्तयंतपरि
चा। वरुणप्रघासैश्चतुरोमासोवृंजतवरुणराजानः। ता
न्छीर्षन्निचावर्त्तयंतपरिचा। साकमेधैश्चतुरोमासोवृंजत
सोमराजानः। तान्छीर्षन्निचावर्त्तयंतपरिचा। यासंवत्सरउपजीवासीत्

तामेषामवृंजत। ततोदेवाअभवन्। परासुराः॥४॥ यएवंवि
द्वाँश्चातुर्मास्यैर्यजते। भ्रातृव्यस्यैवमासोवृक्त्वा। शीर्षन्नि
चवर्त्तयतेपरिचा। येषांसंवत्सरउपजीवावृङ्क्ते। तांभ्रातृव्य
स्य। क्षुध्वास्यभ्रातृव्यःपराभवति। लोहितायसेननिवर्त्त
यते। यद्वाइमामग्निर्ऋतावागतेनिवर्त्तयति। एतदेवैना
ऽरूपंकृत्वानिववर्त्तयति। स्याततस्वस्वोवायसीन्वंत्येति
॥५॥ प्रजायते। यएवंविद्वांल्लोहितायसेननिवर्त्तयते।
एतदेवरूपंकृत्वानिवर्त्तयते। सततःस्वस्वोज्यायान्भव
त्येति। प्रैवजायते। त्रेण्याशलल्यानिवर्त्तयेत। त्रीणित्रीणिवै
देवानामहानि। त्रीणिछंदांसि। त्रीणिसवनानि। त्रयइमेलोकाः।
॥६॥ ऋद्ध्यामेवतद्वीर्यएषुलोकेषुप्रतितिष्ठति। यच्चातुर्मास्ये

Indira Gandhi National
Centre for the Arts

॥५४॥ न्यात्मनो नावद्येत्। देवेभ्य आवृश्च्येत। चतुष्षु चतुष्षु मासेषु नि
वर्त्तयेत। परोक्षमेव तद्देवेभ्य आत्मनो वद्यत्यनाव्रस्काय।
देवानवाएष आनीतः। यस्त्वानुमास्य याजी। य एवं विद्वान्निवर्त्तयते परिस्वाद्देवताप
वात्स्येति। नास्य रुद्रः प्रजां पशूनभिमन्यते॥७॥ एव्येस पयुजतां सुशर इति लोकामन्य
ते॥६॥ आयुषः प्राणꣳ संतनु। प्राणाद्व्यानꣳ संतनु। अपानाद्व्यानꣳ संतनु। व्या
नाच्चक्षुः संतनु। चक्षुषः श्रोत्रꣳ संतनु। श्रोत्रान्मनः संतनु। मनसो वाचꣳ संतनु। वा
च आत्मानꣳ संतनु। आत्मनः पृथिवीꣳ संतनु। पृथिव्या अंतरिक्षꣳ संतनु। अंत
रिक्षाद्दिवꣳ संतनु। दिवः एवैः सुवः संतनु॥१॥ अंतरिक्षꣳ संतनु द्वे वा॥७॥ इं
द्रो दधिचो अस्थ [illegible] भिर्वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव। इच्छन्नश्वस्य यच्छिरः
पर्वतेष्वपश्रितं। तद्विदच्छर्यणावति। अत्राह गोरमन्वत। नाम त्वष्टुरपीच्यं। इ ॥५४॥

हो
त्था चंद्रमसो गृहे। इंद्रमिद्गाथिनो बृहत्॥१॥ इंद्रमर्केभिरर्किणः। इंद्रं वाणीरनू
षत। इंद्र इद्धर्योः सचा। संमिश्ल आवचोयुजा। इंद्रो वज्री हिरण्ययः। इंद्रो दीर्घाय
चक्षसे। आ सूर्यꣳ रोहयद्दिवि। वि गोभिरद्रिमैरयत्॥ इंद्र वाजेषु नो अव। स
हस्रप्रधनेषु च॥२॥ उग्र उग्राभिरूतिभिः। तमिंद्रं वाजयामसि। महे वृत्राय हंतवे।
स वृषा वृषभो भुवत्। इंद्रः स दामने कृतः॥ ओजिष्ठः स बले हितः। द्युम्नी श्लोकी स
सोम्यः। गिरा वज्रो न संभृतः। सबलो अनपच्युतः। ववक्षुरुग्रो अस्तृतः॥३॥
बृहच्छ्वा स्तृतः॥७॥ देवासुराः संयत्ता आसन्। स प्रजापतिरिंद्रं ज्येष्ठं पुत्रमपन्य
धत्त। नेदेनमसुरा बलीयाꣳसोऽहनन्निति। प्रह्रादो ह वै कायाधवः। विरोचन
ꣳ स्वं पुत्रमपन्यधत्त। नेदेनं देवा अहनन्निति। ते देवाः प्रजापतिमुपसमेत्योचुः।

हो ७

नाराजकस्य युद्धमस्ति। इदं मन्विच्छामेति। तं यज्ञक्रतुभिरन्वैच्छन्॥१॥ तं यज्ञक्रतु
भिर्नान्वविन्दन्। तमिष्टिभिरन्वैच्छन्। तमिष्टिभिरन्वविन्दन्। तदिष्टीनामिष्टित्वं। एष
यो ह वै नामा॥ ता इष्टय इत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः। तस्या एतमा
ग्नावैष्णवमेकादशकपालं दीक्षणीयं निरवपन्। तदपकृष्यातश्यत। तान्यत्री संय
जानतउपानयन्॥२॥ तेन इतमेवहुत्वोदद्रवन्। ते प्रायणीयमातिष्ठमाशेहन्। तदपद्रुसा
तन्वत। ताछं युवं। तउपानयन्। तेतदंतमेवहुत्वोदद्रवन्। तआतिथ्यमतिसमा
रोहन्। तदपद्रुसातन्वत। तानिउं तउपानयन्। तेतदंतमेवहुत्वोदद्रवन्। तस्मादे
ताएतदं ता इष्टयः संतिष्ठंते॥३॥ एवं हि देवं अकुर्वत। इति देवा अकुर्वत। इत्युवै मनु ॥५५॥
ष्याः कुर्वते। ते देवा ऊचुः॥ यद्वा इदमुचैर्यज्ञेन चराम। तन्नोऽसुराः पाप्मानुविंदंति।

उपांशूपसदा चराम। तथा नोऽसुराः पाप्मानान्ववेत्स्यंतीति॥ तउपांशूपसदमतन्व
त। तिस्र एव सामिधेनीरनूच्य॥४॥ स्रुवेणाघारमाघार्य। तिस्रः पराचीराहुतीर्उवा
। स्रुवेणोपसदं जुहवां चक्रुः। उग्रं वचो। अपाघीं त्वेषं वचो अपाघीं स्वाहेति। अशन
यापिपासे ह वा उग्रं वचः। एनश्च वैरहत्यं च त्वेषं वचः। एतं ह वाव तच्चतुर्धा विहि
तं पाप्मानं देवा उअपजघ्निरे। तथो एवैतद्देवं विघजमानः। तिस्र एव सामिधेनीर
नूच्य। स्रुवेणाघारमाघार्य॥५॥ तिस्रः पराचीराहुतीर्हुत्वा। स्रुवेणोपसदं जु
होति। उग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहेति। अशनयापिपासे ह
वा उग्रं वचः॥ एनश्च वैरहत्यं च त्वेषं वचः। एतमेव तच्चतुर्धा विहितं पाप्मानं य
जमानोऽपहते। ते त्रीणि होमाः पशुमालंभंत। अत्र एवत देवा अवार्ति पाप्मानंम
त्युमपजघ्निरे। तेनाति नीयव रात्रेः प्रावहन्। राविया एवत देवा अवर्तिपा

Indira Gandhi National Centre for the Arts

॥५६॥ प्मानं मृत्युमयजघ्निरे॥६॥ तस्मादितिनीयेवाहः पशुमालभेत। अरुः एवत यजमा
नोवर्तिपाप्मानं भ्रातृव्यानमनुदते। तेनातिनीवेवरात्रेः प्रवदेत। रात्रियाएवत्त
यजमानोवर्तिपाप्मानं भ्रातृव्यानपनुदते। सएषउपवसथीयहे हृदेवस्यः पशु
ला
शालभ्यते। द्वयंवाअस्मिं लोकेयजमानः॥ अस्थिचमाꣳसंच। अस्थि चैवतेनमाꣳ
सं च यजमानः सꣳस्कुरुते। तावा एताः पंचदेवताः। अग्नीषोमावग्निर्मित्रावरुणौ
॥७॥ पंचपंती वै यजमानः। त्वङ्माꣳसꣳस्नावास्थिमज्जा। एतमेवतत्संचय्या
विहितमात्मानं वरुणपाशान्मुंचति॥ तेयजन्तायेनिर्वरुणा यातꣳसप्तति
श्छंदोतिः प्रातरद्वयन्त्। तस्मात्सप्तयनुरूतनाराशꣳसि प्रातरनुवाकेनूच्यें
ते। तमेतयोपस्थमेत्योपासीदन्॥ उपास्मैगायतानरइति। तस्मादेतयाबहिष्प ॥५६॥
वमानमुपस्थः॥८॥ ऐच्छन्नेनयꣳस्तिथेनेनूच्यानूच्यसुवेदाघारमाघार्य

रात्रियाएवतद्देवा अवर्तिपाप्मानं मृत्युमयजघ्निरे मित्रावरुणेनवचादेवाय
जमानोदेवादेवायजमानोयजमानः। आचरत्यचरेदाल्भंतालभेतभ्रातृव्या
न॥९॥ ससमुद्रमुत्तरतः प्राज्वलद्भूम्यंतेन। एषवावससमुद्रः। यञ्चात्वालः
एषउवेवसभूम्यंतः। यद्वेद्यंतः। तद्देतत्रिशालंत्रिपुरुषं। तस्मात्त्रिविद्वतेस्त
खनंति। ससुवर्णरजताभ्यांकुसीभ्यांपरिगृहीतआसीत्। तंयदस्याअध्यजनय
न्। तस्माद्दास्यः॥१॥ अथयत्सुवर्णरजताभ्यांकुशीभ्यांपरिगृहीतआसीत्॥
सास्यकौशिकतातत्त्रिवृतातिआस्रवत तंत्रिवृतादद्दत। तंत्रिवृताइरन्। यावती
त्रिवृतोमात्रा। तंपंचदशेनाभिप्रास्रवत। तंपंचदशेनाददत। तंपंचदशेनाह
रन्। यावतीपंचदशस्यमात्रा॥२॥ तꣳसप्तदशेनातिप्रास्रवत। तꣳसप्तदशे
नाददतां तꣳसप्तदशेनाहरन्॥ यावतीसप्तदशस्यमात्रा। तस्यसप्तदशेनाद्वय
माणस्यनेजोद्दशेपतन्। तमेकविꣳशेनाभिप्रास्रवत। तमेकविꣳशेनाददत।

॥५७॥ तमेकविंशेनाहरन् ॥ यावत्येकविंशस्य मात्रा । नेयत्त्रिवृता स्तुवते ॥३॥ त्रि
वृतैव तद्यजमानमादद्दते । तं त्रिवृतैव हरंति । यावती त्रिवृतो मात्रा । अग्निर्वै
त्रिवृत् । यावद्वा अग्नेर्दहतो धूम उदेत्यानुव्येति । तावती त्रिवृतो मात्रा । अ
ग्नेरेवैनं तत् । मात्रां सायुज्यं सलोकतां गमयंति । अथ यत्पंचदशेन स्तु
वते । पंचदशेनैव तद्यजमानमादद्दते ॥४॥ तं पंचदशेनैव हरंति । यावती पं
चदशस्य मात्रा । चंद्रमा वै पंचदशः । एष हि पंचदश्यामपक्षीयते । पंचदश्या
मापूर्यते । चंद्रमस एवैनं तत् । मात्रां सायुज्यं सलोकतां गमयंति । अथ
यत्सप्तदशेन स्तुवते । सप्तदशेनैव तद्यजमानमादद्दते ॥ तं सप्तदशेनै
व हरंति ॥५॥ यावती सप्तदशस्य मात्रा । प्रजापतिर्वै सप्तदशः । प्रजापतेरेवैनं
तत् ॥ मात्रां सायुज्यं सलोकतां गमयंति । अथ यदेकविंशेन स्तुवते । ॥५७॥

ति२

एकविंशेनैव तद्यजमानमादद्दते ॥ तमेकविंशेनैव हरंति । यावत्येकविं
शस्य मात्रा । असौ वा आदित्य एकविंशः । आदित्यस्यैवैनं तत् ॥६॥ मात्रां सा
युज्यं सलोकतां गमयंति । ते कुर्युः । व्यहृश । तेऽहोरात्रे अभवतां । अहरेव स्तुव
र्णं तवत् । रजता रात्रिः ॥ स यद्हादित्य उदेति । एतामेव तत्सुवर्णां कुशीमनुसमेति । अ
थ यदस्तमेति । एतामेव तद्रजतां कुशीमनुसंविशति । प्रह्लादो ह वै कायाधवः । विरो
चनं स्वं पुत्रमुदास्यत् । स प्रदरोऽभवत् । तस्मात्प्रदरादुदकं नाचामेत् ॥७॥ आदि
त्यः पंचदशस्य मात्रा स्तुवते पंचदशेनैव तद्यजमाना ददते सप्तदशेनैव हरंत्यादित्य
स्यैवैनं तद्धि शंति चत्वारि ॥१०॥ चैव चत्वारः स्तोमाः । कृतं तत् । अथ पंच । कलिः सः ।
तस्माच्चतुष्टोमः ॥ तच्चतुष्टोमस्य चतुष्टोमत्वं । तदाहुः । कतमानि तानि ज्योतीं
षि । य एतस्य स्तोमा इति । त्रिवृत्पंचदशः सप्तदश एकविंशः ॥१॥ एतानि वाव

Indira Gandhi National Centre for the Arts

॥५८॥

प।

नाभिज्योतिषं भि। य एतस्य स्तोमाः। सोऽब्रवीत्॥ स सप्तदशेन क्रियमाणोऽप्यले
क्षिपि। नित्यस्य तमेति। तमश्विनौ धानाभिरतिबध्यतां। पूषा करंभेण॥ ताः स्तूतीप
रिवापेण। मित्रावरुणो पयस्यया। तदाहुः॥२॥ यदश्विभ्यां धानाः। पूष्णः करंभाः
॥ भारत्यै परिवापः॥ मित्रावरुणयोः पयस्याथ। कस्मादेतेषां हविषामिं
द्रमेव यजंतीति। एता ह्येनं देवता इति ब्रूयात्। एते हि वित्तिरिति ब्रूयात्तस्मादि
ति। नव सप्तदशाकपालेन प्रातःसवने ति ब्रूयात्। ऐंद्र एकादशकपालेन माध्यंदि
ने सवने। विश्वे देवा द्वादशकपालेन तृतीयसवने॥३॥ स यदष्टाकपालान् प्रातः
सवने कुर्यात्। एकादशकपालान्माध्यंदिने सवने। द्वादशकपालांस्तृतीयस
वने विलोमतद्यज्ञस्य क्रियेत। एकादशकपालानेव प्रातःसवने कुर्यात्। एकाद ॥५८॥
शकपालान्माध्यंदिने सवने। एकादशकपालांस्तृतीयसवने। यज्ञस्य सलो

मताय॥ तदाहुः। यद्वसूनां प्रातःसवनं रुद्राणां माध्यंदिनं सवनं। विश्वेषां देवा
नां तृतीयसवनं। अथ कस्मादेतेषां हविषामिंद्रमेव यजंतीति॥ एता ह्येनं देवता
न्ब्रूयात्। एते हि वित्तिरिति ब्रूयात्तस्मादिति॥४॥ एकविंशत्या अस्तूतीयस
वने प्रातःसवनं पंचच॥५॥ तस्या वा वो वपादाद्विततुः॥ तमेते उ सप्तसु छंद
स्स्वयन्। तद्गायत्री यस्या आयतीयत्वं। यदवारयन्। तद्वारवंतीयस्य वारवंतीयत्वं।
तस्या वाच एवा वपादादविमथुः। तस्मादेतानि सप्त चतुरुत्तराणि छंदांसु पाद्दा
घः। तेषामतिरात्राण्युपश्लिष्यंत। तत्रो एवुदतवन्॥१॥ स बृहतीमेवास्पृशत्। द्वाभ्यां म
राभ्यां। अहोरात्राभ्यामेव। तदाहुः। कतमा सा देवाक्षरा बृहती। यस्यां तत्प्रतिष्ठि
त्। द्वादशपौर्णमास्यः। द्वादशाष्टकाः। द्वादशामावास्याः। एषा वाव सा देवाक्षरा
बृहति॥२॥ यस्यां तत्प्रतिष्ठितेति। यानि च छंदांस्यत्यरिच्यंत। यानि च न्यूदत वैन्द

Indira Gandhi National Centre for the Arts

॥५७॥

तानि निर्वीर्याणि हीनान्यमन्यंत। साब्रवीद्बृहती। मामेव भूत्वा। मामुपसंश्रयते
ति। चतुर्भिरक्षरैरनुष्टुब्बृहतीं नोदभवत्॥ चतुर्भिरक्षरैः पंक्तिर्बृहतीमुपसम
रा श्रयतां। अष्टाभिरक्षरैरुष्णिग्बृहतीं नोदभवत्। अष्टाभिरक्षरैस्त्रिष्टुग्बृहती
मत्यरिच्यत। तस्मादेतान्यष्टावक्षराण्यपछिद्याद्धतात्। ते बृहतीमेव भूत्वा॥ बृ
हतीमुपसमश्रयतां। द्वादशभिरक्षरैर्गायत्री बृहतीं नोदभवत्। द्वादशभिरक्ष
रैर्जगती बृहतीमत्यरिच्यत। तस्मादेतानि द्वादशाक्षराण्यपछिद्याद्धतात्॥ ते
ते२ बृहतीमेव भूत्वा। बृहतीमुपसमश्रयतां। सोऽब्रवीत्प्रजापतिः। छंदसां श्रिरयोमेऽभ
वत। युष्माभिरहमेतमध्वानमनुसंचराणीति। तस्य गायत्री च जगती च पक्षावभ
वतां। उष्णिक्ककुभौ प्रपक्ष्यौ। अनुष्टुप्पंक्तिश्च धुर्यौ। बृहत्येवोद्धिरभवत्। स
एतं छंदोरथमास्थाय। एतमध्वानमनुसमचरात्। एतं ह वै छंदोरथमास्थाय ॥५७॥

एतमध्वानमनुसंचरति। येनैष एतत्संचरति। य एवं विद्वान्सोमेन यजते। य उ
चैनमेवं वेद॥५॥ अम वन्यावत्सादेवान्क्षरा बृहस्पदया द्वादशाक्षराण्यपछि
द्याद्धाद्ध्याय षट्॥२॥ अग्नेः कृत्तिका यस्तु एपं देवस्य सवितुर्बृहवादिनः क
ल्स्तेनमेव देवा वा आयुषइंद्रो दधीचो देवासुराः य प्रजापतिः स समुद्रो ये वै वार
त्यायावा द्वादश अग्नेः कृत्तिका वग्रहा ऋतमेव व्यमिवति। स्त्रः पराचीर्यवै चत्वा
रोनव पंचाशत्॥५०॥७॥७॥ ॐ अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति।
ये प्रत्यंचः शम्याया अवशीयंते। तन्नैर्ऋतमेककपालं। इयं वा अनुमतिः। इयं नि
र्ऋतिः॥ नैर्ऋतेन पूर्वेण प्रचरति। पाप्मानमेव निर्ऋतिं पूर्वां निरवदयते॥
एककपालो भवति। एकधैव निर्ऋतिं निरवदयते। यदकृत्वा गार्हपत्य इयुः॥१॥
रुद्रो भूत्वाग्निरनूत्थाय। अध्वर्युं च यजमानं च हन्यात्। वीहि स्वाहाहुतिं जुहोति। इदं सा

Indira Gandhi National Centre for the Arts

॥६०॥ ह।आहुत्यैवैनꣳ शमयति।नार्तिमार्छत्यध्वर्युर्न्न यजमानः।एकोल्मुकेन
यंति।तद्धि निर्ऋत्यै भागधेयं।इमां दिशं यंति।एषा वै निर्ऋत्यै दिक्।स्वायामे
वैनं दिशि निर्ऋतिं निरवदयते॥२॥स्वकृत इरिणे जुहोति प्रदरे वा।एतद्वै निर्ऋ
त त्या आयतनं।स्व एवायतने निर्ऋतिं निरवदयते।एष ते निर्ऋते भाग इत्याह।नि
र्दिशत्येवैनां।भूते हविष्मत्यसीत्याह।भूतिमेवोपावर्त्तते।मुंचेममꣳहस
इत्याह।अꣳहस एवैनं मुंचति।अंगुष्ठाभ्यां जुहोति॥३॥अंतत एव निर्ऋतिं नि
रवदयते।कृष्णं वासः कृष्णतूषं दक्षिणा।एतद्वै निर्ऋत्यै रूपं।रूपेणैव निर्ऋ
तिं निरवदयते।अप्रतीक्षमायंति।निर्ऋत्या अंतर्हित्यैः।स्वाहा नमो य इदं ॥६०॥
चकारेति पुनरेत्य गार्हपत्ये जुहोति।आहुत्यैव नमस्यंतो गार्हपत्यमुपावर्त्तंते।

आनुमते न प्रचर इति।इयं वा अनुमतिः॥४॥इयमेवास्मै राज्यमनुमन्यते।धे
नुर्दक्षिणा।इमामेव धेनुं कुरुते।आदित्यं चरुं निर्वपति।उभयीष्वेव प्रजास्वभि
षिच्यते।दैवीषु च मानुषीषु च।वरो दक्षिणा।वरो हि राज्यꣳ समृद्ध्यै।आग्ना
वैष्णवमेकादशकपालं निर्वपति।अग्निः सर्वा देवताः॥५॥विष्णुर्यज्ञः।देवता
श्चैव यज्ञं चावरुंधे।वामनो वही दक्षिणा।यद्वही।तेनाग्नेयः।यद्वामनः।तेन
वैष्णवः समृद्ध्यै।अग्नीषोमीयमेकादशकपालं निर्वपति।अग्नीषोमाभ्यां वा
इंद्रो वृत्रमहन्निति।यदग्नीषोमीयमेकादशकपालं निर्वपति॥६॥वार्त्रघ्नमे
व विजिति[illegible]दक्षिणा समृद्ध्यै।इंद्रो वृत्रꣳ हत्वा।देवताभिश्चेंद्रियेण च व्या
र्ध्यत।स एतमैंद्राग्नमेकादशकपालमपश्यत्।तन्निरवपत्।तेन वै स देवता

Indira Gandhi National
Centre for the Arts

॥६१॥

आ

भ्य इंद्रियं चावरुंधे । यदैंद्राग्नमेकादशकपालं निर्वपति देवताभ्य एव तेनेंद्रियं
च यजमानो वरुंधे । ऋषभो वही दक्षिणा ॥७॥ यद्वही तेनाग्नेयः । यदृषभः
तेनैंद्रः समृध्यै । आग्नेयमष्टाकपालं निर्वपति ऐंद्रं दधि । यदाग्नेयो भवति ।
अग्निर्वै मुखं । यज्ञमुखमेवर्द्धिं पुरस्ताद्धत्ते । यदैंद्रं दधि ॥८॥ इंद्रियमेवाव
रुंधे । ऋषभो वही दक्षिणा । यद्वही तेनाग्नेयः ॥ यदृषभः । तेनैंद्रः समृध्यै
। यावतीर्वै प्रजा ओषधीनामहुतानामाश्नन् ॥ ताः पराभवन् । आग्रयणं
भवति हुताद्याय । यजमानस्यापराभावाय ॥९॥ देवा वा ओषधीष्वाजिमयुः
। ता इंद्राग्नी उदजयतां । तावेतमैंद्राग्नं द्वादशकपालं निरवृणीतां । यदैंद्राग्न
मवत्युज्जित्यै । द्वादशकपालो भवति । द्वादश मासाः संवत्सरः । संवत्सरे तौ ॥६१॥

वास्मा अन्नमवरुंधे । वैश्वदेवश्चरुर्भवति । वैश्वदेवं वा अन्नं । अन्नमेवास्मै स्वदयति ॥१०॥
प्रथमजो वत्सो दक्षिणा समृध्यै । सौम्यं श्यामाकं चरुं निर्वपति । सोमो वा अ
कृष्टपच्यस्य राजा । अकृष्टपच्यमेवास्मै स्वदयति । वासो दक्षिणा । सौम्यं हि दे
वतया वासः समृध्यै । सरस्वत्यै चरुं निर्वपति । सरस्वते चरुं । मिथुनमेवावरुंधे ।
मिथुनौ गावौ दक्षिणा समृध्यै । एति वा एष यज्ञमुखादृध्याः । योऽग्नेर्देवता
या एति । अष्टावेतानि हवींषि भवंति । अष्टाक्षरा गायत्री । गायत्रोऽग्निः । ते
नैव यज्ञमुखादृध्या अग्नेर्देवतायै नैति ॥११॥ इषुर्निरवदयते उष्मान्पापु
होऽस्नुमतिर्देवता निर्वपति वही दक्षिणा यदैंद्रं दध्यपराभावाय स्वदयति
गावो दक्षिणा समृध्यै वद ॥१२॥ वैश्वदेवेन वै प्रजापतिः प्रजा असृजत ता
च्छान् प्राजायंत । सोऽग्निरकामयत । अहमिमाः प्रजा जनयेयमिति । स प्रजापतये

स वा

ता य

आना

Indira Gandhi National Centre for the Arts

॥६२॥

च मदध्यात्॥सोशोचत्प्रजामिच्छमानः।तस्माद्यं च प्रजा गुतक्रि पंचम।ताभ्यो शो
चतः प्रजामिच्छमानो।तास्वाग्निमप्यसृजत्।ता अग्निरध्यैत्॥१॥सोमो रेतो द
धात्।सविता प्राजनयत्।सरस्वती वाचमध्यधीत्।पूषा पोषयत्।ते वा एते
त्रिः संवत्सरस्य प्रयुज्यंते।ये देवाः पुष्टिपतयः।संवत्सरो वै प्रजापतिः।संवत्स
रेणैवास्मै प्रजाः प्राजनयत्॥ताः प्रजा जाता मरुतो घ्नन्।अस्मानपि न प्रायु
क्षतेति॥२॥स एतं प्रजापतिर्मारुतं सप्तकपालमपश्यत्।तं निरवपत्।
ततो वै प्रजाभ्योऽकल्पत।यन्मारुतो निरुप्यते।यज्ञस्य क्लृप्त्यै।प्रजानामघाता
य।सप्तकपालो भवति।सप्तगणा वै मरुतः।गणश एवास्मै विशं कल्पयति।
स प्रजापतिरशोचत्॥३॥याः पूर्वाः प्रजा असृक्षि।मरुतस्ता अवधिषुः।कथ ॥६२॥
मपराः सृजेयेति।तस्य शुष्म आंडं भूतं निरवर्तत।तद्व्युदहरत्।तदपोषयत्।

तत्प्रजायत।आंडस्य वा एतद्रूपं।यदामिक्षा।यद्व्युदहरति॥४॥प्रजा एव तद्यज
मानः पोषयति।वैश्वदेव्यामिक्षा भवति।वैश्वदेव्यो वै प्रजाः।प्रजा एवास्मै प्रजन
यति।वाजिनमानयति।प्रजास्वेव प्रजातासु रेतो दधाति।द्यावापृथिव्य एकक
पालो भवति।प्रजा एव प्रजाता द्यावापृथिवीभ्यामुभयतः परिगृह्णाति।देवा
सुराः संयत्ता आसन्।सोभिब्रवीत्॥५॥मामग्रे यजत।मया मुखेनासुरां जेष्यथे
ता।मां द्वितीयमिति सोमोऽब्रवीत्।मया राज्ञा जेष्यथेति।मां तृतीयमिति सवि
ता।मया प्रसूता जेष्यथेति।मां चतुर्थीमिति सरस्वती॥इंद्रियं वो हं धास्या
मीति।मां पंचममिति पूषा।मया प्रतिष्ठया जेष्यथेति॥६॥तेग्निना मुखेनासु
रानजयन्।सोमेन राज्ञा।सवित्रा प्रसूताः।सरस्वतीन्द्रियमदधात्।पूषा प्रति

न

Indira Gandhi National Centre for the Arts

दो

ष्वासीत्। ततो वै देवा व्यजयंत। यदेता निहवींषि निरूप्यंते विजित्यै। नोत्तरवेदि
मुपवपति। पशवो वा उत्तरवेदिः। अजाता इव ह्येते तर्हि पशवः॥१॥ एदित्यशौ च द्यु
द्वरस्यब्रवीत्प्रतिष्ठयाजेष्यथेत्येते हि पशवः॥२॥ त्रिवद्धि भवति। माता
पिता पुत्रः॥ तदेव तन्मिथुनं। उल्वं गर्भो जरायु। तदेव तन्मिथुनं। त्रेधा बर्हिः सं
९५ नद्धं भवति। त्रय इमे लोकाः। एष्वेव लोकेषु प्रतितिष्ठति। एकधा पुनः संनद्धं
भवति। एक इव ह्ययं लोकः॥१॥ अस्मिन्नेव तेन लोके प्रतितिष्ठति। प्रसुवो भ
वंति। प्रथमजामेव पुष्टिं मवरुंधे। प्रथमजो वत्सो दक्षिणा समृध्यै। पृषदा
ज्यं गृह्णाति। पशवो वै पृषदाज्यं। पशूनेवाव रुंधे। पंचगृहीतं भवति। पांक्ता ॥६३॥

हि पशवः। बहुरूपं भवति॥२॥ बहुरूपा हि पशवः समृध्यै। अग्निं मंथंति। अग्नि
मुखा वै प्रजापतिः प्रजा असृजत। यदग्निं मंथंति। अग्निमुखा एव तत्प्रजा
यजमानः सृजते। नव प्रयाजा इज्यंते। नवानूयाजाः। अष्टौ हवींषि। द्वा
वाघशौ। द्वावाज्यभागौ॥३॥ त्रिंशत्संपद्यंते। त्रिंशदक्षरा विराट्। अन्नं
विराट्। विराजैवान्नाद्यमवरुंधे। यजमानो वा एककपालः। तेज आज्यं। यदेकक
पाल आज्यमानयति। यजमानमेव तेजसा समर्द्धयति। यजमानो वा एककपालः।
पशव आज्यं॥४॥ यदेककपाल आज्यमानयति। यजमानमेव पशुभिः समर्द्धय
ति। यदल्पमानयेत्। अल्पा एनं पशवो भुंजंत उपतिष्ठेरन्। यद्बह्वानयेत् बह
व एनं पशवो भुंजंत उपतिष्ठेरन्। यजमानो वा एककपालः। एककपालस्यावद्यु
तु॥५॥ यजमानस्यावद्येत्। उद्वा माद्येद्यजमानः॥ प्रवा मीयेत। सकृदेव होतव्यः। स

Indira Gandhi National Centre for the Arts

॥६४॥

अ

छुरिव हि सुवर्गो लोकः। हुत्वाभि जुहोति। यजमानमेव सुवर्गं लोकं गमयित्वा।
तेजसा समर्धयति। यजमानो वा एककपालः। सुवर्गो लोक आहवनीयः।
।यदेककपालमाहवनीये जुहोति। यजमानमेव सुवर्गं लोकं गमयति। यद्ध
स्तेन जुहुयात्। सुवर्गाल्लोकाद्यजमानमव विच्छिन्द्यात्। स्रुचा जुहोति। सुवर्गस्य लो
कस्य समष्ट्यै। यत्राद्ध्येत दिवलोकमभिजयेत्। यद् [illegible] पितृलोकं यत्प्र
[illegible]।७। [illegible] सि यज्ञं [illegible]। [illegible] मनुष्यलोकमभिजयेत्। प्रति
ष्ठितो होतव्यः। एककपालं वै प्रतितिष्ठन्तं द्यावापृथिवी अनु प्रतितिष्ठतः। द्या
वापृथिवी ऋतवः। ऋतून्यज्ञः। यज्ञं यजमानः। यजमानं प्रजाः। तस्मात्प्रतिष्ठि
तो होतव्यः।८। वाजिनो यजति। अग्निर्वायुः सूर्यः। ते वै वाजिनः। तानेव त ॥६४॥

यजति। अथो खल्वाहुः। छन्दांसि वै वाजिन इति। तान्येव तद्यजति। ऋक्सामे
वा इन्द्रस्य हरी सोमपानौ। तयोः परिधय आधानं। वाजिनं भागधेयं।९। य
दप्रहृत्य परिधीञ्जुहुयात्। अन्तराधानाभ्यां घासं प्रयच्छेत्। प्रहृत्य परिधी
ञ्जुहोति। निराधानाभ्यामेव घासं प्रयच्छति। बर्हिषि विषिञ्चन्वाजिनमानयति
। प्रजा वै बर्हिः। रेतो वाजिनं। प्रजास्वेव रेतो दधाति। समुपहूय भक्षयन्ति। एत
त्सोमपीथा ह्येते। अथो आत्मन्नेव रेतो दधते। यजमान उत्तमो भक्षयति। पश
वो वै वाजिनं। यजमान एव पशून्प्रतिष्ठापयन्ति।१०। लोको बहुरूपं भवत्या
ज्यभागो पशव आज्यमव द्यदाहवनीयः प्रसकू तस्मात्प्रतिष्ठो नो होतव्यो मा
गजे यमेतेव त्वारिवा ३। प्रजापतिः सविता भूत्वा प्रजा असृजत। ता एनमत्यम

Indira Gandhi National Centre for the Arts

॥६४॥ व्यंत। ता अस्मादपाक्रामन्। तावरुणो भूत्वा प्रजा वरुणेनाग्राहयन्। ताः प्रजा वरु
णागृहीताः। प्रजापतिं पुनरुपाधावं नाथमिच्छमानाः। स एतान्प्रजापतिर्वरुण
प्रघासानपश्यन्। तान्निरवपन्। तैर्वै स प्रजा वरुणपाशादमुंचत्। यद्वरुणप्र
घासा निरुप्यंते॥१॥ प्रजा नाम वरुणग्राहाय। तासां दक्षिणो बाहुर्व्यकृत आसी
त्। सव्यः प्रकृतः। स एतां द्वितीयां दक्षिणतो वेदिमुदहन्। तया वै स प्रजानां
दक्षिणं बाहुं प्रासारयत्। यद्द्वितीयां दक्षिणतो वेदिमुद्धंति। प्रजानामेव तद्य
जमानो। दक्षिणं बाहुं प्रसारयति। तस्माच्चातुर्मास्ययाज्युपमुष्मिंल्लोके उभय
बाहुः। यज्ञाभिजितं ह्यस्यापृथ्यमात्राद्वेदी अंससंभिन्ने भवतः॥२॥ तस्मात्स्थ्यमा
त्रं व्युंसो। उत्तरस्यां वै घासमुत्तरवेदिमुपवपति। पशवो वा उत्तरवेदिः। पशूनेवा
वरुंधे। अथो यज्ञपुरुषो नंतरिंत्से। एतद्वा लक्षणं [illegible]व पंच हवींषि। अथो षडैंद्राग्नो ॥६५॥

भवति। प्राणापानौ वा एतौ देवानां। यदिंद्राग्नी। यदैंद्राग्नो भवति॥३॥ प्राणापाना
वेवावरुंधे। ओजो बलं वा एतौ देवानां। यदिंद्राग्नी। यदैंद्राग्नो भवति। ओजो ब
लमेवावरुंधे। मारुत्यामिक्षा भवति। वारुण्यामिक्षा। मेषी च मेषश्च भवतः।
मिथुनादेव प्रजा वरुणपाशान्मुंचति। लोमशौ भवतो मेध्यत्वाय॥४॥ श
मीपर्णान्युपवपति। घासमेवाभ्यामधियच्छति। प्रजापतिमन्नाद्यं नोपान
मत्। स एतेन शतेनेह हविषां नाद्यमवारुंध। यत्संशताः शमीपर्णानि भव
ति। अन्नाद्यस्यावरुध्यै। सोऽस्याभिनेकरीराणि। सोऽस्यारवलु वा आह निर्दिवो
वृष्टिं च्यावयति। यत्करीराणि भवंति। सोऽस्यैवा हुस्याद्विबोधि भवरुंधे।
काय एककपालो भवति। प्रजानां कायायां गातिपूरुषं कं मया गापि भवति।
ना ताएव प्रजा वरुणपाशान्मुंचति। एकमतिरिक्तं। जनिष्यमाणा देव प्रजा वरु
णपाशान्मुंचति॥५॥ निष्पंते भवतो भवति मेध्यत्वाय स्रुवे बदं॥४॥ उत्तरस्यां
वद्यामन्सो। निरु क्षिं विसादयति। दक्षिणायां मातुरी। अथ फक्रमेवैना

Indira Gandhi National Centre for the Arts

॥६६॥ युनक्ति। अथो ऊर्ज एवास्मा अवहरति। तस्माद्ब्रह्मक्षत्राच्च विशोऽन्यतोऽपकर्षि
णीः। मारुत्या पूर्वया प्रचरति। अन्ततमेनावयजते। वारुण्योत्तरया। अन्तत ए
व वरुणमवयजते। यदेवाध्वर्युः करोति॥१॥ तत्प्रतिप्रस्थाता करोति। तस्माद्य
ने च्छ्रेयान्करोति। तत्पापीयान्करोति। पत्नीं वाचयति। मेध्यामेवैनां करोति। अथो
तप एवैनामुपनयति। यज्जारं सन्तं न प्रब्रूयात्। प्रियं ज्ञातिं रुन्ध्यात्। अ
सौ मे जार इति निर्दिशेत्। निर्दिश्यैवैनं वरुणपाशेन ग्राहयति॥२॥ प्रघास्या
न्हवामह इति पत्नीमुदानयति। आहुतैवैनां। पत्नी पुरोनुवाक्यामनुब्रूया
त्॥ निर्वीर्यो यजमानः स्यात्। यजमानो ह्याह। आत्मन्नेव वीर्यं धत्ते। उभौ याज्या
ं सवीर्यत्वाय। यद्ग्रामे यदरण्य इत्याह। यथोदितमेव वरुणमवयजते। यज ॥६६॥
मानदेवत्यो वा आहवनीयः॥३॥ भ्रातृव्यदेवत्यो दक्षिणः। यदाहवनीये जुहुया
त्। यजमानं वरुणपाशेन ग्राहयेत्। दक्षिणेऽग्नौ जुहोति। भ्रातृव्यमेव वरुणपा

शेन ग्राहयति। शूर्पेण जुहोति। अन्नमेव वरुणमवयजते। शीर्षन्नधिनिधाय जु
होति। शीर्षत एव वरुणमवयजते। प्रत्यङ् तिष्ठञ्जुहोति॥४॥ प्रत्यङ्ङेव वरुणपाशा
न्निर्मुच्यते। अकन्कर्म कर्मकृत इत्याह। देवानृणं निरवदाय अनृणा गृहानु
पप्रेतेति वावैतदाह। वरुणगृहीतं वा एतद्यज्ञस्य। यद्यजुषा गृहीतस्यातिरिच्यते।
तुषाश्च निष्कासश्च। तुषैश्च निष्कासेन चावभृथमवैति। वरुणगृहीतेनैव वरु
णमवयजते। अपोऽवभृथमवैति॥५॥ अप्सु वै वरुणः। साक्षादेव वरुणमवयज
ते। प्रतियुतो वरुणस्य पाश इत्याह। वरुणपाशादेव निर्मुच्यते। अप्रतीक्षमायन्ति। व
रुणस्यान्तर्हित्यै। एधोऽस्येधिषीमहीत्याह। समिधैवाग्निं नमस्यन्त उपायन्ति। तेजो
ऽसि तेजो मयि धेहीत्याह। तेज एवात्मन्धत्ते॥६॥ करोति गार्हपत्यमाहवनीयं दक्षिणं जु
होति। सपोऽवभृथमवैतीत्यन्ते॥५॥ देवासुराः संयत्ता आसन्। सोऽग्निरब्रवीत्। ममेय

॥६७॥ मनीकवतिनः॥ तां प्रत्तीत। अथासुरानभिभविष्यथेति। ते देवा अग्नयेनीकवते
पुरोडाशमष्टाकपालन्निरवपन्॥ सोग्निरनीकवान्त्स्वेन भागधेयेन प्रीतः। चतु
र्द्धानीकान्यजनयत। ततो देवा अभवन्। परासुराः॥१॥ यदग्नयेनीकवते पुरो
च डाशमष्टाकपालं निर्वपति। अग्निमेवानीकवन्तꣳ स्वेन भागधेयेन प्रीणाति
॥ सोग्निरनीकवान्त्स्वेन भागधेयेन प्रीतः। चतुर्द्धानीकानि जनयते। असौ वा आ
दित्योग्निरनीकवान्। तस्य रश्मयोनीकानि। साकꣳ सूर्येणोद्यता निर्वपति।
साक्षादेवास्मा अनीकानि जनयति। तेसुराः पराजिता यन्तः। द्यावापृथिवी उपा
श्रयन्॥२॥ ते देवा मरुद्भ्यः सान्तपनेभ्यश्चरुं निरवपन्। तां द्यावापृथिवीभ्यामेवो
भयतः समतपन्। यन्मरुद्भ्यः सान्तपनेभ्यश्चरुं निर्वपति। द्यावापृथिवीभ्यामेव
रुभैतः। दुभयतो यजमानो भ्रातृव्यान्त्संतपति। मध्यंदिने निर्वपति। तर्हि हि नो ॥६७॥

ष्ठिष्ठं तपति। चतुर्भवति। सर्वत एवैनान्त्संतपति। ते देवाः श्वो विजयिनः सन्तः॥
सर्वासान्दुग्धे गृहमेधीयं चरुं निरवपन्॥३॥ आशिता एवाद्योपवसाम।
कस्य वाहेदं कस्य वा श्वो न वितेति। स स्ततोभवत्। तस्याहुतस्य नाश्यम
न्न हि देवा अहुतस्याश्नन्तीति। तेब्रुवन्॥ कस्मा इमꣳ होष्याम इति। मरुद्भ्यो
गृहमेधिभ्य इत्यब्रुवन्। तं मरुद्भ्यो गृहमेधिभ्योजुहवुः॥४॥ ततो देवा अभव
न्। परासुराः। यस्यैवं विदुषो मरुद्भ्यो गृहमेधिभ्यो गृहे जुह्वति। भवत्यात्म
ना। परास्य भ्रातृव्यो भवति। यद्वै यज्ञस्य पाकत्रा क्रियते। पशव्यं तन्
पाकत्रा वा एतत्क्रियते। यन्नेध्माबर्हिर्भवति। न सामिधेनीरन्वाह॥ पान
प्रयाजा इज्यन्ते। नानूयाजाः। य एवं वेद। पशुमान्भवति। आज्यभागौ यजति।
यज्ञस्यैव चक्षुषी नान्तरेति। मरुतो गृहमेधिनो यजति। भागधेयेनैवैना

Indira Gandhi National Centre for the Arts

॥६८॥

प

समृद्धयति। अग्निꣳ स्विष्टकृतं यजति प्रतिष्ठित्यै। इडान्तो भवति। पशवो वा इडा। प
शुष्वेवोपरिष्टात्प्रतितिष्ठति॥६॥ असुरा अस्य पुण्यं गृहमेधीयं वर्तुं निरवपन्नु
हवुरन्वाहर्डो तो भवति द्वेव॥६॥ यस्य पत्नी गृहमेधीयं पश्यादूनी यात्। गृहमेधी
वस्यात्। विदुस्य यज्ञ ऋध्येत। यन्नाश्नीयात्। अगृहमेधी स्यात्। नास्य यज्ञो
व्यृध्येत। प्रतिवेशं पचेयुः। तस्याश्नीयात्। गृहमेध्येव भवति। नास्य यज्ञो व्य
र्ध्यते॥७॥ ते देवा गृहमेधीयेनेष्ट्वा। आशिता अभवन्। आञ्जताभ्यञ्जत। अ
नु वत्सानवासयन्। तेभ्योऽसुरः क्षुधं प्राहिण्वन्। सा देवेषु लोकमवित्वा।
असुरान्पुनरगच्छत्। गृहमेधीयेनेष्ट्वा। आशिता भवन्ति। आञ्जतेऽभ्यञ्जते।
अनु वत्सान्वासयन्ति। भ्रातृव्यायैव तद्यजमानः क्षुधं प्रहिणोति॥ ॥६८॥
ते॥२॥ ते देवा गृहमेधीयेनेष्ट्वा। इडायां निष्कासं न्यदधुः। अस्माने व्ववर्डो नि

हित भागउपावर्तितेति। नाभिंद्धोऽनिहितभागउपावर्तत। गृहमेधीयेनेष्ट्वा।
इडायां निष्कासं निदध्यात्। इड एवैनं निहितभागउपावर्तते। गार्हपत्ये जु
होति॥३॥ भागधेयेनैवैनꣳ समर्धयति। ऋषभमाह्वयति। वषट्कार एवा
स्य सः। अथो इन्द्रियमेव तद्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते। इन्द्रो वृत्रꣳ ह
त्वा। परां परावतमगच्छत्। अपाराधमिति मन्यमानः। सो ब्रवीत्। क इदं
वेदिष्यतीति। ते ब्राह्मणा अरुतो वरं वृणामहै॥४॥ अथ वयं वेदाम। अस्मभ्य
मेव प्रथमꣳ हविर्निरुप्यता इति। त एनमध्यक्रीडन्। तत्क्रीडिनां क्रीडित्वं।
यन्मरुद्भ्यः क्रीडिभ्यः प्रथमꣳ हविर्निरुप्यते विजित्यै। साकꣳ सूर्येणोद्यता
निर्वपति। एतस्मिन्वै लोक इन्द्रो वृत्रमहन्समृद्ध्यै। एतद्ब्राह्मणान्येव पंच हवीꣳ
षि। एतद्ब्राह्मण इन्द्राग्नः। अथ परं इन्द्रश्चतुर्भवति॥५॥ उद्धारं वा एतमिन्द्र उदहर ३

Indira Gandhi National Centre for the Arts

॥६७॥ सो

तावृत्रꣳ हत्वा। अन्यासु देवतास्वधि। यदेष ऐन्द्र इव बनुर्भवति। उद्धारमेवैतं यज
मान उद्धरते। अन्यासु प्रजास्वधि। वैश्वकर्मण एककपालो भवति। विश्वान्येवैते
न कर्माणि यजमानो वरुन्धे ॥६॥ ऋध्यते ध्यंजते ज्रुहोतिक्षणमेडेभवत्यष्टौव
॥७॥ वैश्वदेवेन वै प्रजापतिः प्रजा असृजत। ता वरुणप्रघासैर्वरुणपाशात्प्रमुञ्चत्
साकमेधैः प्रत्यस्थापयत्। त्र्यम्बकै रुद्रं निरवादयत। पितृयज्ञेन सुवर्गं लोकम
गमयत्। यद्वैश्वदेवेन यजते। प्रजा एव तद्यजमानः सृजते। ता वरुणप्रघासैर्वरु
णपाशान्मुञ्चति। साकमेधैः प्रतिष्ठापयति। त्र्यम्बकै रुद्रं निरवदयते ॥१॥ पि
तृयज्ञेन सुवर्गं लोकं गमयति। दक्षिणतः प्राचीनावीती निर्वपति। दक्षिणावृ
द्धि पितॄणाम्। अनादृत्य तत्। उत्तरत एवोपवीय निर्वपेत्। उभये हि देवाश्च पि
तरश्चेज्यन्ते। अथो यदेव दक्षिणार्धे पिष्ययति। तेन दक्षिणावृत्। सोमा ॥६७॥

य पितृमते पुरोडाशꣳ षट्कपालं निर्वपति। संवत्सरो वै सोमः पितृमान् ॥२०॥ संव
त्सरमेव प्रीणाति। पितृभ्यो बर्हिषद्भ्यो धानाः। मासा वै पितरो बर्हिषदः। मासानेव
प्रीणाति। यस्मिन्वा ऋतौ पुरुषः प्रमीयते। सोऽस्यामुष्मिँल्लोके भवति। बहुरूपा
धाना भवन्ति। अहोरात्राणामभिजित्यै। पितृभ्योऽग्निष्वात्तेभ्यो मन्थम्। अर्धमासा
वै पितरोऽग्निष्वात्ताः ॥३॥ अर्धमासानेव प्रीणाति। अभिवान्यायै दुग्धे भवति।
सा हि पितृदेवत्यं दुहे। यत्पूर्णम्। तन्मनुष्याणाम्। उपर्यर्धो देवानाम्। अर्धः पितॄणाम्।
॥ अर्ध उपमन्थति। अर्धो हि पितॄणाम्। एकयोपमन्थति ॥४॥ एका हि पितॄणाम्। द
क्षिणोपमन्थति। दक्षिणावृद्धि पितॄणाम्। अनारभ्योपमन्थति। तद्धि पितॄणा
ख्यति। इमां दिशं वेदिमुद्धन्ति। उभये हि देवाश्च पितरश्चेज्यन्ते। चतुःस्रक्तिर्भवति। स
र्वा ह्यनुदिशः पितरः। अश्वान्नाम भवति ॥५॥ स्वा ता हि देवानाम्। मध्यतोऽधिरीचीयते।

Indira Gandhi National Centre for the Arts

॥७०॥ अंतो हि देवानां प्राचीपते । वर्हीष्या निध्नइत्या भवति व्यावृत्से । परिश्रयति । अंत
र्हितो हि पितृलोको मनुष्यलोकात् । यस्य ऋषि दिनं तद्देवानां । यद्दंतरा । तन्मनु
स ष्याणां ॥६॥ यत्समूलं । तत्पितृणां । समूलं बर्हिर्भवति व्यावृत्से । दक्षिणास्तृणाति । द
क्षिणावृद्धि पितृणां त्रिः पर्येति । तृतीये वा इतो लोके पितरः ॥ तानेव प्रीणाति । त्रिः
पुनः पर्येति । षट्संपद्यंते ॥७॥ षड्वा ऋतवः । ऋतूनेव प्रीणाति । यत्प्रस्तरं यजुषा
गृह्णीयात् । प्रमायुको यजमानः स्यात् । यन्न गृह्णीयात् । अनायतनः स्यात् । तूष्णी
मेव न्यस्येत् । न प्रमायुको भवति । नानायतनः । पत्नीन्परिधीन्परिदध्यात् ॥८॥
मत्सुता यजमानं परिगृह्णीयात् । यन्न परिदध्यात् । रक्षांसि यज्ञं हन्युः
द्वौ परिधी परिदधाति । रक्षसामपहत्यै । अथो मर्त्योरेव यजमानमुत्सृजति ।
पूर्णी तित्रीणि हविंषु दाहरेयुः । न यस्मात्पशवः साकं प्रमीयेरन् । एकैकम ॥१०॥

नूवीनान्युदाहरेति । एकैकस्य वै पामंच्चयः प्रमीयते । कशिपु कशिपव्याय । उपब
र्हणमुपबर्हण्याय । आंजनमांजन्याय । अभ्यंजनमभ्यंजन्याय । यथाभागमेवैना
न्प्रीणाति ॥९॥ निरवदयते पितृमान श्चिषाता एकया यमेवस्य समानो भवति मनु
ष्याणां पद्यंते परिदध्यान्नायते पंचच्च ॥८॥ अग्नये देवेभ्यः पितृभ्यः समिध्यमा
नायानुब्रूहीत्याह । उभये हि देवाश्च पितरश्चेध्यंते । एकामन्वाह । एका हि पितृ
णां त्रिरन्वाह । त्रिर्हि देवानां । आश्रावयति । यज्ञपथारनंतरित्यै । नार्षे
यं वृणीते । न होतारं ॥१॥ यदार्षेयं वृणीतां यद्धोतारं । प्रमायुको यजमानः स्या
त् । प्रमायुको होता । तस्मान्न वृणीते । यजमानस्य होतुर्गोपीथाय । अपबर्हिषः
प्रयाजान्यजति । प्रजा वै बर्हिः । प्रजा एव मृत्योरुत्सृजति । आज्यभागौ यजति ॥२॥
यज्ञस्यैव चक्षुषी नान्तरेति । प्राचीनावीती सोमं यजति । पितृदेवत्यो हि । एषाहुतिः ।
पंच हवो नयति । पंच ह्येता देवताः । द्वे पुरोनुवाक्ये । याज्या देवता वषट्कारः । ताव

Indira Gandhi National Centre for the Arts

।।७२।।

णाति। संततमवद्यति।।३।। ऋतूनां संवत्सरो। ये वैभ्यः पूर्वयापुरोनुवाक्यया ह।
प्रणयति द्वितीययागमयति याज्यया। तृतीये वा इतो लोके पितरः। अह एवैनान्पू
र्वयापुरोनुवाक्ययानयति। रात्रिर्ये द्वितीयया। एवैनान्याज्ययागमयति। द
क्षिणतो वेदाय। उदंड‍ति क्रामति व्यावृत्से।।४।। आश्रवयेत्याश्रावयति। अस्तु स्वधे
ति प्रत्याश्रावयति। स्वधानम इति वषट्कारोति। स्वधाकारो हि पितॄणां। सोममग्रे
यजति। सोमप्रयाजा हि पितरः। सोमं पितृमंतं यजति। संवत्सरो वै सोमः पितृमा
न्। संवत्सरमेवतद्यजति। पितृन्बर्हिषदो यजति।।५।। ये वै यज्वानः।। ते पितरो
बर्हिषदः।। तानेवतद्यजति। पितृनग्निष्वात्तान्यजति। ये वा अयज्वानो गृहमेधिनः
।। ते पितरोग्निष्वात्ताः। तानेवतद्यजति। अग्निं कव्यवाहनं यजति। य एव पितृणाम
ग्निः। तमेवतद्यजति।।६।। अथो यथाग्निं स्विष्टकृतं यजति। तादृगेव तन्नू। एतत्ते
ततये त्वामन्विति तिस्रषु स्रक्तीषु निदधाति। तस्मादातृतीयात्पुरुषान्नाम न गृह्ण ।।७२।।

ति।। एतावंतो हि ज्यंते। अत्र विपरो यथाभागं मंदध्वमित्याह। ह्रीका हि पितरः। उदंचो
निष्क्रामंति। एषा वै मनुष्याणां दिक्। स्वामेव तद्दिशमनुनिष्क्रामंति।।७।। आहव
नीयमुपतिष्ठते। व्येवा एते घ्नंवते। यत्सस्या हवनीये। अथान्यत्र चरंति। आतमि
तोरुपतिष्ठंते। अग्निमेवोपद्रष्टारं कृत्वा पितृन्निरवदयते। अंतं वा एते प्राणानां
गच्छंति। पश्चातमितोरुपतिष्ठंते। सुसंदृशं त्वा वयमित्याह।।८।। प्राणो वै सुसंदृक्
। प्राणमेवात्मन्दधते। योजान्विंद्रते हरी इत्याह। प्राणमेव पुनरयुक्त। अक्षन्न
मीमदंत ही ति गार्हपत्यमुपतिष्ठंते। अक्षन्नमीमदंताथ वो पतिष्ठामहइति वा वै
तदाह। अमीमदंत पितरः सोम्या इत्यसि प्रपद्यते। अमीमदंत पितरो यथा भि प्रप
न्नामहइ वा वैतदाह। अपः परिषिंचति। मार्जयंत एवैनान्।।९।। अथो तर्पयंत्येवा
तृप्यति प्रजया पशुभिः। य एवं वेद। अपबर्हिषावनूयाजौ यजति। प्रजा वै बर्हिः

Indira Gandhi National Centre for the Arts

॥७२॥ प्रजा एव मृत्योरुत्सृजति । चतुरः प्रयाजान्यजति । द्वावनूयाजौ । षट्संपद्यंते । षड्वा
ऋतवः ॥१०॥ ऋतूनेव प्रीणाति । न पत्न्यन्वालभते । न संयाजयंति । यत्पत्न्यन्वाली
कु ता । यत्संयाजयेयुः । प्रमायुका स्यात् । तस्मान्नान्वालभते । न संयाजयंति । पत्निये गो
पीथाय ॥११॥ होतारमन्यभागो यजति संततमवद्यति व्यावृत्त्यै । यदेयज
तितमेव तद्यजत्यनुनिष्क्रामं स्वाहेत्याह तवोनवच ॥ प्रतिपूर्वमेककपालान्निर्व
पति । जाता एव प्रजा रुद्रान्निरवदयते । एकमतिरिक्तं । जनिष्यमाणा एव प्रजा
रुद्रान्निरवदयते । एककपाला भवंति । एकधैव रुद्रं निरवदयते । नाभिघार
यति । यदभिघारयेत् ॥ अंतरवचारिणं रुद्रं कुर्यात् । एकोल्मुकेन यंति ॥१॥
तद्धि रुद्रस्य भागधेयं । इमां दिशं यंति । एषा वै रुद्रस्य दिक् । स्वायामेव दि
शि रुद्रं निरवदयते । रुद्रो वा अपशुका या आहुत्यै नातिष्ठता अस्रोते पशुरिति नि ॥७२॥

र्दिशेद्यं द्विष्यात् । यमेव द्वेष्टि । तमस्मै पशुं निर्दिशति । यदि न द्विष्यात् । आखुस्ते पशु
रिति ब्रूयात् ॥२॥ न ग्राम्यान्पशून्हिनस्ति । नारण्यान् । चतुष्पथे जुहोति । एष वा अ
ग्नीनां पड्वीशो नाम । अग्निर्वै स्वेव जुहोति । मध्यमेन पर्णेन जुहोति । स्रुग्घ्येषा । अथो
खलु । अंतममेव होतव्यं । अंतत एव रुद्रं निरवदयते ॥३॥ एष ते रुद्र भागः स
ह स्वस्राम्बिकयेत्याह । शरद्वा अस्याम्बिका स्वसा । तया वा एष हिनस्ति । यं हिन
स्ति । तयैवैनं सह शमयति । भेषजं गवऽइत्याह । यावंत एव ग्राम्याः पशवः । तेभ्यो
भेषजं करोति । अवांब रुद्रमदिमहीत्याह । आशिषमेवैतामाशास्ते ॥४॥ त्र्यंबकं
यजामहऽइत्याह । मृत्योर्मुक्षीय मामृतादिति वावैतदाह । उत्किरंति । भगस्य लीप्सं
ते । मूते कृत्वासजंति । यथा जनं यते वसं करोति । तादृगेव तत् । एष ते रुद्र भाग इत्या
ह निरवत्यै । अप्रतीक्षमायंति । अपः परिषिंचति । रुद्रस्यांतर्हित्यै । प्र वा एतेस्मा
ल्लोकाच्यवंते । ये त्र्यंबकैश्चरंति । आदित्यं चरुं पुनरेत्य निर्वपति । इयं वा अदितिः ।

Indira Gandhi National Centre for the Arts

॥ यं तिष्ठ्यान्निरवदयन्नेशात्संवत्सिषहू ॥ ॥ श्री

अस्यामेव प्रतितिष्ठंति ॥ ५ ॥ अनुमत्यै वेश्वदेवेन स्रष्टिर्वल्प्रजापति । रमवितोनरश्यां ॥७२॥

नामचंद्रायनमः ॥ ॥ अनुमत्यै वेश्वदेवेन स्रष्टिं वत्प्रजापतिः । स मवितोनरश्यां

देवासुराः सोग्निर्यस्मिन्वै श्वदेवेन तावनुणाप्रयासेरन्नयेदेवेभ्यः प्रतिपूरुषं अ

नुमत्यैप्रथमजोवत्सो बहुरूपाहि पशवस्तस्मात्स्य मात्रं यद्दप्ययेदेवेभ्यः प्रतिपूरु

षं पंच स प्रतिदद्मः ॥ ॥ ३ ॥ एतद्ब्राह्मणान्येव पंचहवींषि । अथेंद्रा यशुनासीरा

६ वायुरोडाशं द्वादशकपालं निर्वपति । संवत्सरो वा इंद्राः शुनासीरः ॥ संवत्सरेणैवा

स्मा अन्नमवरुंधेवायव्यं पयो भवति । वायुर्वे वृष्टेः प्रदापयिता । स एवास्मै वृ

ष्टिं प्रदापयति । सौर्य एककपालो भवति । सूर्यो वा अमुष्मिंलोके वृष्टिं धर्ता

सएवास्मै वृष्टिं नियच्छति ॥ १ ॥ द्वादशगवं सीरं दक्षिणा समृद्ध्यै । देवासुराः

संयत्ता आसन् । ते देवा अग्निमब्रुवन् । त्वया वीरेणासुरानभिभवामेति । सोब्रवी ॥७२॥

त् । त्रेधाहमात्मानं विकरिष्य इति । स त्रेधात्मानं व्यकुरुत । अग्निं तृतीयं । रुद्रं

तृतीयं । वरुणं तृतीयं ॥ २ ॥ सोब्रवीत् । क इदं तुरीयमिति । अहमितींद्रोब्रवीत् । सं

तु सृजावहा इति । तौ समसृजेतां । स इंद्रस्तुरीयमभवत् । यदिंद्रस्तुरीयमभ

वत् । तदिंद्रतुरीयस्येंद्रतुरीयत्वं । ततो वै देवा व्यजयंत । यदिंद्रतुरीयं निरुप्यते वि

जित्यै ॥ ३ ॥ वहिनी धेनुर्दक्षिणा । यद्वहिनी । तेनाग्नेयी । यद्गौः । तेन रौद्री । यद्धेनुः

तेनैंद्री । यत्स्त्री सती दांता । तेन वारुणी समृद्ध्यै । प्रजापतिर्यज्ञमसृजत ॥ ४ ॥

तं सृष्टं रक्षांस्यजिघांसन् । स एताः प्रजापतिरात्मनो देवता निरमि

मीत । ताभिर्वै स दिग्भ्यो रक्षांसि प्राणुदत । यत्संचावतं संजुहोति । दिग्भ्य एव त

द्यजमानो रक्षांसि प्रणुदते । समूढं रक्षः संदग्धं रक्ष इत्याह । रक्षांस्ये

व संदहति । अग्नये रक्षोघ्ने स्वाहेत्याह । देवताभ्य एव विजिज्ञानाभ्यो भागधे

यं करोति । प्रष्टिवाही रथो दक्षिणा समृद्ध्यै ॥ ५ ॥ इंद्रो वृत्रं हत्वा ॥ असुरान्

॥७४

शमाव्या। नमुचिमासुरं नालभन्त। तं शच्यागृह्णात्। तौ समलभेतां।... स्माद
भिशुनतरो ऽभवत्। सो ऽब्रवीत्। संधां संदधावहै। अथ त्वाव स्रक्ष्यामि। न मा
शुष्केण नार्द्रेण हनः॥६॥ न दिवा न नक्तमिति। स एतमपां फेनमसिंचत्। न वा
एष शुष्को नार्द्रो व्युष्टासीत्। अनुदितः सूर्यः। न वा एतद्दिवा न नक्तं तस्यैतस्मि
ल्लोके। अपां फेनेन शिर उदवर्तयत्। तदेनमन्ववर्तत। मित्रद्रुगिति॥७॥ स ए
तानपामार्गानजनयत्। तानजुहोत्। तैर्वै स रक्षांस्यपाहत। यदपामार्गहोमो
भवति। रक्षसामपहत्यै। एकोल्मुकेन यन्ति। तद्धि रक्षसां भागधेयं। इमां दिशं य
न्ति। एषा वै रक्षसां दिक्। स्वायामेव दिशि रक्षांसि हन्ति॥८॥ स्वकृत इरिणे जुहो
ति। प्रदरे वा। एतद्वै रक्षसामायतनं। स्व एवायतने रक्षांसि हन्ति। पर्णमयेन ॥७४॥
स्रुवेण जुहोति। ब्रह्म वै पर्णः। ब्रह्मणैव रक्षांसि हन्ति। देवस्य त्वा सवितुः प्रस

व इत्याह। सवितृप्रसूत एव रक्षांसि हन्ति। हतं रक्षो वधिष्मेत्याह। र
क्षसां स्तृत्यै। यद्वसन्ति। तद्दक्षिणा निरवस्यै। अप्रतीक्षमायन्ति। रक्षसामंत
र्हित्यै। ... यद्धि तिस्र... तृतीयं विजिताः अस्मज्जनं समद्य हनो मित्रं द्रुग्
हिंस्यो॥ ॥ यच्छति वरणं तृतीयं विजिस्या... ॥ आग्नेयं पुरोडाशं द्वादशकपालं निर्वपति। संवत्सरो
ति हन्ति रक्षस्यैत्रो लिच॥१॥ आग्नेयं पुरोडाशं द्वादशकपालं निर्वपति। संवत्सरो
वै ध्याता। संवत्सरेणैवास्मै प्रजाः प्रजनयति। अन्वेवास्मा अनुमतिर्मन्यते।
राते राका। प्र सिनीवाली जनयति। प्रजास्वेव प्रजातासु कुह्वा वाचं दधाति। मिथु
नौ गावौ दक्षिणा समृद्ध्यै। आग्नावैष्णवमेकादशकपालं निर्वपति। ऐन्द्रावैष्णवं
मेकादशकपालं॥१॥ वैष्णवं त्रिकपालं। वीर्यं वा अग्निः। वीर्यमिन्द्रः। वीर्यं विष्णु
प्रजा एव प्रजाता वीर्ये प्रतिष्ठापयति। तस्मात्प्रजा वीर्यावतीः। वामनमृषभो वह
दक्षिणा। यद्वही तेनाग्नेयः। यदृषभः॥२॥ तेनैन्द्रः। यद्वामनः। तेन वैष्णवः समृद्ध्यै।

सं० ... 1 ... ०४३

Indira Gandhi National
Centre for the Arts

ब्र०म०भा०सं० ७०८८

॥७५॥ अग्नीषोमीयमेकादशकपालं निर्वपति। ऐंद्रासोमीयमेकादशकपालं। सौम्यं च
रुं॥ सोमो वै रेतोधाः। अग्निः प्रजानां प्रजनयिता। वृद्धानामिंद्रः प्रदापयिता।
सोम एवास्मै रेतो दधाति॥१॥ अग्निः प्रजां प्रजनयति। वृद्धामिंद्रः प्रयच्छति॥
बा बभ्रुर्दक्षिणा समृद्ध्यै। सोमापौष्णं चरुं निर्वपति। ऐंद्रापौष्णं चरुं। सोमो वै रे
तोधाः। पूषा पशूनां प्रजनयिता। वृद्धानामिंद्रः प्रदापयिता। सोम एवास्मै रेतो
दधाति। पूषा पशून्प्रजनयति॥४॥ वृद्धानिंद्रः प्रयच्छति। पौष्णश्चरुर्भवति॥
इयं वै पूषा। अस्यामेव प्रतितिष्ठति। श्यामो दक्षिणा समृद्ध्यै। बहु वै पुरुषो मे
ध्यमुपगच्छति। वैश्वानरं द्वादशकपालं निर्वपति। संवत्सरो वा अग्निर्वैश्वा
नरः। संवत्सरेणैवैनं स्वदयति। हिरण्यं दक्षिणा॥५॥ पवित्रं वै हिरण्यं। पुना ॥७५॥
त्येवैनं। बहु वै राजन्योऽनृतं करोति। उपजाम्यै हरते। जिनाति ब्राह्मणं। वद

तनूतं। अन्नतेरपक्लृवै क्रियमाणे वरुणो गृह्णाति। वारुणं यवमयं चरुं निर्वप
ति। वरुणपाशादेवैनं मुंचति। अश्वो दक्षिणा। वारुणो हि देवतयाश्वस्समृद्ध्यै
॥१॥ ऐंद्रावैष्णवमेकादशकपालं यदृमो दधाति पुषा पशत्प्रजयति हिरण्यं यस्य
णा दक्षिणैकं च॥२॥ रत्निनामेतानि हवींषि भवति। एते वै राष्ट्रस्य प्रदातारः।
एते पादातारः। य एव राष्ट्रस्य प्रदातारः। ये पादातारः॥ त एवास्मै राष्ट्रं प्रयच्छंति।
राष्ट्रमेव भवति। यत्समाहस्य निर्वपेत्। अरत्निनस्युः। यथायथं निर्वपति रत्निनां
या॥१॥ यत्सद्यो निर्वपेत्। यावतीमेकेन हविषाशिषमवरुंधे। नावकूप्तीमवकल्पते
॥ अन्वहं निर्वपति। भूयसीमेवाशिषमवरुंधे। भूयसो यज्ञक्रतूनुपैति। बार्हस्प
त्यं चरुं निर्वपति ब्रह्मणो गृहे। मुखत एवास्मै ब्रह्म संश्यति। अथो ब्रह्मन्नेव स

Indira Gandhi National Centre for the Arts

॥७६॥ ऋषभं भवति। शितिपृष्ठो दक्षिणा समृद्ध्यै॥२॥ ऐंद्रमेकादशकपालं राजन्यस्य
गृहे। इंद्रियमेवावरुंधे। ऋषभो दक्षिणा समृद्ध्यै। आदित्यं चरुं महिष्यै गृहे। इयं
वा अदितिः। अस्यामेव प्रतितिष्ठति। धेनुर्दक्षिणा समृद्ध्यै। भगाय चरुं वावातायै
गृहे। भगमेवास्मिन्दधाति॥ विचित्रगर्भा पष्ठौही दक्षिणा समृद्ध्यै॥३॥ नैर्ऋ-
तं चरुं परिवृक्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नं। पाप्मानमेव निर्ऋतिं निरव-
दयते। कृष्णा कूटा दक्षिणा समृद्ध्यै। आग्नेयमष्टाकपालं सेनान्यो गृहे। से-
नामेवास्य संश्यति। हिरण्यं दक्षिणा समृद्ध्यै। वारुणं दशकपालं सूतस्य
गृहे। वरुणसवमेवावरुंधे। महानिरष्टो दक्षिणा समृद्ध्यै॥ मारुतं सप्तक-
पालं ग्रामण्यो गृहे॥४॥ अन्नं वै मरुतः। अन्नमेवावरुंधे। पृश्निर्दक्षिणा स-
मृद्ध्यै। सावित्रं द्वादशकपालं क्षत्तुर्गृहे प्रसूत्यै। उपध्वस्तो दक्षिणा समृद्ध्यै।
आश्विनं द्विकपालं संग्रहीतुर्गृहे। अश्विनौ वै देवानां भिषजौ। ताभ्यामेवास्मै ॥७६॥

भेषजं करोति। सवात्यौ दक्षिणा समृद्ध्यै। पौष्णं चरुं भागदुघस्य गृहे॥५॥ अन्नं
वै पूषा। अन्नमेवावरुंधे। श्यामो दक्षिणा समृद्ध्यै। रौद्रं गावीधुकं चरुमक्षावा-
पस्य गृहे। अंतत एव रुद्रं निरवदयते। शबल उद्वारो दक्षिणा समृद्ध्यै। द्वादशै-
तानि हवींषि भवंति। द्वादश मासाः संवत्सरः। संवत्सरेणैवास्मै शूषमवरुंधे।
शूष्प एव भवति॥६॥ यन्न प्रतिनिर्वपेत्। रत्निन आशिषो वरुंधीरन्। प्रतिनिर्व-
पति। इंद्राय सुत्राम्णे पुरोडाशमेकादशकपालं। इंद्रायांहोमुचे। आशिषमेवा-
वरुंधे। अयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यादित्याह। आशिषमेवैतामा-
शास्ते। मैत्राबार्हस्पत्यं भवति। श्वेतायै श्वेतवत्सायै दुग्धे॥७॥ बार्हस्पत्ये मैत्रमप-
दधाति। ब्रह्म चैवास्मै क्षत्रं च समीची दधाति। अथो ब्रह्मन्नेव क्षत्रं प्रतिष्ठापयति
॥ बार्हस्पत्येन पूर्वेण प्रचरति। मुखत एवास्मै ब्रह्म संश्यति। अथो ब्रह्मन्नेव

Indira Gandhi National Centre for the Arts

॥२२॥ त्रमेवारूमयति । स्वयंकृता वेदिर्भवति स्वयं दिनं बर्हिः । स्वयंकृत इध्मः ॥ अनभिजि
चो तस्याभिजित्यै । तस्माद्ब्राह्मणस्यानभिजिते । सैवैतस्यैव यः । सैव दक्षिणा समृद्धे
॥८॥ रत्निनाय समृद्धौ पष्ठौही दक्षिणा समृद्धे ग्रामण्यो गृहे भागदुघस्य गृहे भवन्
त्युभे भिजित्ये द्वे च ॥२॥ देवसुवामेतानि हवींषि भवन्ति । एतावन्तो वै देवानां स
वाः । त एवास्मै सवान्प्रयच्छन्ति । त एनं सुवन्ते । अग्निरेवैनं गृहपतीनां सुवते
वा५ । सोमो वनस्पतीनां । रुद्रः पशूनां । बृहस्पतिर्वाचां । इन्द्रो ज्येष्ठानां । मित्रः सत्यना
॥१॥ वरुणो धर्मपतीनां । एतदेव सर्वं भवति । सविता प्रसवानां सुवतामिति हस्तं
गृह्णाति प्रसूत्यै । ये देवा देवसुव स्थ स्वाहा । पथ्यायजुरेवैतन्न । महते क्षत्राय महत
आधिपत्याय महते जानराज्यायेत्याह । आशिषमेवैतामाशास्ते । एष वो भरता
राजा सोमोऽस्माकं ब्राह्मणानां राज्येत्याह । तस्मात्सोमराजानो ब्राह्मणाः । प्र ॥२२॥

तिसवं नाम राज्यमधायीत्याह ॥२॥ राज्यमेवास्मिन्प्रतिदधाति । स्वान्नु वं वरुणो
अशिश्वेदित्याह । वरुणसवमेवावरुन्धे । शुचे मित्रस्य व्रत्या अभूमेत्याह ।
शुचिमेवैनं व्रत्यं करोति । अमन्महि महत ऋतस्य नामेत्याह । मनुत एवैनं
स वैव्राता वरुणस्याभूवन्नित्याह । सर्वव्रातमेवैनं करोति । वि मित्र एवैर
रातिमतारीदित्याह ॥२॥ अरातिमेवैनं तारयति । असूषुदन्त यज्ञिया ऋत
तेनेत्याह । स्वदयत्येवैनं । व्युत्रितो जरिमाणं न आनडित्याह । आयुरेवास्मि
न्दधाति । द्वाभ्यां विमृष्टे । द्विपाद्यजमानः प्रतिष्ठित्यै । अग्नीषोमीयस्य चैकाद
शकपालस्य देवसुवां च हविषामग्नये स्विष्टकृते समवद्यति । देवताभिरे
वैनमुभयतः परिगृह्णाति । विष्णुक्रमान्क्रमते । विष्णुरेव भूत्वेमाँल्लोकान्

Indira Gandhi National Centre for the Arts

॥७८॥ भिजयति ॥४॥ सस्था नाम धापी स्वाहा तारी दिस्था ह क्रमत एकं च ॥ ॥ अर्थे
चे तस्थे ति जुहोति । आहुत्यैवैनामि ष्कृीय गृह्णाति । अथो हविष्कृतामेवाभि
घृतानां गृह्णाति । वहंतीनां गृह्णाति । एता वा अपां राष्ट्रं । राष्ट्रमेवास्मै गृ
अ४ ह्णाति । अथो यमेवैनमभिवहंति । अपां पतिरसि स्वाहा । मिथुनमेवाकः । वृ
षास्यूर्मिरसि स्वाहा ॥१॥ ऊर्मिमंतमेवैनं करोति । वृषसेनोसि स्वाहा । सेनामेवा
स्य संश्यति । व्रजक्षित स्थ स्वाहा । एता वा अपां विशः । विशमेवास्मै पर्यू
हति । मरुतामोज स्थ स्वाहा । अन्नं वै मरुतः । अन्नमेवावरुंधे । सूर्यवर्चस
स्थ स्वाहा ॥२॥ राष्ट्रमेव वर्चस्व्यकः । सूर्यत्वचस स्थ स्वाहा । सत्यं वा एतत् । यद्व ॥७८॥
र्षति । अनृतं यदातपति वर्षति । सत्यानृते एवावरुंधे । नैनं सत्यानृते उदि १ने

ते हिंस्तः । य एवं वेद । मांदा स्थ स्वाहा । राष्ट्रमेव ब्रह्मवर्चस्यकः ॥३॥ वाशा स्थ स्वा
हा । राष्ट्रमेव वश्यकः । शक्वरी स्थ स्वाहा । पशवो वै शक्वरीः । पशूनेवावरुंधे । वि
श्वभृत स्थ स्वाहा । राष्ट्रमेव पयस्व्यकः । जनभृत स्थ स्वाहा । राष्ट्रमेवेंद्रिया
व्यकः । अग्नेस्तेजस्या स्थ स्वाहा ॥४॥ राष्ट्रमेव तेजस्व्यकः । अपामोषधीना
ं रस स्थ स्वाहा । राष्ट्रमेव मधव्यमकः । सारस्वतं गृह्णाति । एषा वा अ
पां पृष्ठं । यत्सरस्वती । पृष्ठमेवैनं समानानां करोति । षोडशाग्रं गृह्णाति
। षोडशकलो वै पुरुषः । यावानेव पुरुषः । तस्मिन्वीर्यं दधाति । षोडशभिर्जुहो
ति षोडशभिर्गृह्णाति । द्वात्रिंशत्संपद्यंते । द्वात्रिंशदक्षरानुष्टुक् । वागनु
ष्टुप्सर्वाणि छंदांसि । वाचैवैनं सर्वेभिः छंदोभिरभिषिंचति ॥५॥ ऊर्मिं

Indira Gandhi National
Centre for the Arts

ते२

१७॥ स्याह सूर्यवर्चसस्के स्याह ब्रह्मवर्चस्य कस्रो जस्यास्ये स्याहैव पुरुषः षड्॥५॥
मधमतीभिः सृज्यधुमिसाह। ब्रह्मणो वैनाः सउं सृजति
शान्ति देवाशयः संमधमहूतीर्मधमतीभिः। अंतराहोतु स्वधिष्ण्यं ब्राह्म
। अनाधृष्टाः सीद स्याह। ब्रह्मणो वैनाः सादयति। अंतराहोतु स्वधिष्ण्यं ब्राह्म
णाच्छउं सिन स्थसादयति। आग्नेयो वै होता। ऐंद्रो ब्राह्मणाच्छउं सि। तेजसा
वैवेंद्रियेणचोभयतो राष्ट्रं परिगृह्णाति। हिरण्येनोत्पुनोति। आयुर्वै हिर
ण्यं। शतमानं भवति। शतायुः पुरुषः शतेंद्रियः।
विजाप्यासुपनंतिव्यावृत्यै॥१॥ शतमानं भवति। शतायुः पुरुषः शतेंद्रियः। आयुष्येवेंद्रिये प्रतितिष्ठति। अग्निष्टमसीत्स्याह। अग्निम्हवृं हयततू। वाचो
आयुष्येवेंद्रिये प्रतितिष्ठति। अग्निमम्हसीस्याह। अग्निम्हवृं हयततू। सोमस्यदात्रमसी
बृंधरिस्याह। वाचोह्यषबंधुः। तपोजाइस्याह। तपोजाहोतनू। सोमस्यदात्रमसी
स्याह॥२॥ सोमस्यद्वैन्नदात्रं। शुक्राकः शुक्रेणोत्पुनामीस्याह। शुक्रोह्यायः। शु
क्रउं हिरण्यं। चंद्राश्चंद्रेणस्याहा चंद्राह्यायः। चंद्रउं हिरण्यं। अमृता अमृतेन ॥७८॥

स्याह। अमृताह्यायः अमृतउं हिरण्यं॥३॥ स्वाहा राजस्सूयायेस्याह। राजस्सूया
यव्येनाउत्पुनाति। सधमादोद्युम्निनीरूर्ज एता इति वारुण्य वीगृह्णाति। वरु
णसवमेवावरुंधे। एकधागृह्णाति। एकधैव यजमाने वीर्यं दधाति। क्षत्रस्यो
ल्वमसि क्षत्रस्य योनिरसीति तार्प्यं चोष्णीषं च प्रयच्छति सयोनित्वाय। एक
शतेन दर्भपुंजीलैः पवयति। शतायुर्वै पुरुषः शतवीर्यः। आत्मैकशतः॥४॥
यावानेव पुरुषः। तस्मिन्वीर्यं दधाति। दध्याशयति। इंद्रियमेवावरुंधे। उदुं
बरमाशयति। अन्नाद्यस्यावरुध्ये। शष्पाण्याशयति। सुरावलिमेवैनं करो
ति। आविद एता भवंति। आविदमेवैनं गमयंति॥५॥ अग्निरेवैनं गार्हपत्येना
वति। इंद्र इंद्रियेण। पूषा पशुभिः। मित्रावरुणौ प्राणापानाभ्यां। इंद्रो वृत्रा
य वज्रमुद्यच्छत्। स दिवमलिखत्। सोऽर्यम्णः पंथा अभवत्। स द्यावाविने
द्यावापृथिवी धृतव्रते इति द्यावापृथिवी उपधावत्। स आभ्यामेव प्रसूत इंद्रो वृ

Indira Gandhi National Centre for the Arts

॥८०॥ त्रायवसं प्राहन्। आविन्ने द्यावापृथिवी धृतव्रते इत्याह॥६॥ आभ्यामेवैनं
स्मृतो यजमाने वशं भ्रातृव्याय प्रहरति। आविन्ना देव्यदितिर्विश्वरूप्यास्
सूतो यजमाने वशं भ्रातृव्याय प्रहरति। आविन्ना देव्यदितिर्विश्वरूपीत्याह।
इयं वै देव्यदितिर्विश्वरूपी। अस्यामेव प्रतितिष्ठति। आविन्नो यमसावामुष्याय
णोस्यां विश्यस्मिन्राष्ट्र इत्याह। विशैवैनꣳ राष्ट्रेण समर्धयति। महते क्षत्राय म
हत आधिपत्याय महते जानराज्यायेत्याह। आशिषमेवैतामाशास्ते। एष वोऽभरता
ता राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजेत्याह। तस्मात्सोमराजानो ब्राह्मणाः॥७॥ इन्द्र
स्य वज्रोऽसि वार्त्रघ्न इति धनुः प्रयच्छति विजित्यै। शत्रुबाधनाः स्थेतीषून्। शत्रूनेवास्य
बाधन्ते। पात मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पातेत्याह। तिस्रो वै शरव्याः। प्र
तीची तिरश्च्यनूची। ताभ्य एवैनं पान्ति। दिग्भ्यो मा पातेत्याह। दिग्भ्य एवैनं पान्ति।
विश्वाभ्यो मा नाष्ट्राभ्यः पातेत्याह। अपरिमितादेवैनं पान्ति। हिरण्यवर्णावुषसां
विरोक इति। इन्द्रियमेव वीर्यं त्रिष्टुभा बाहुत्वं कुरोति। इन्द्रियं वै वीर्यं त्रिष्टुक्। इन्द्रियमेव वीर्यं ॥८०॥
प्रुपरिष्टाद्धत्ते॥८॥ व्याघ्रस्येदा ... त्याह। मत्तो हिरण्यमेकशतो गमयं

त्याह ब्राह्मणानाꣳ भ्यः पातेत्याह चत्वारि च॥६॥ दिशो व्यास्थापयति। दिशामभि
जित्यै। यदनु प्रक्रामेत्। अभि दिशो जयेत्। उत्सुमाद्येत्। मनसानुप्रक्रामति। अभि
दिशो जयति। नोन्माद्यति। समिधमातिष्ठेत्याह। तेज एवावरुन्धे॥१॥ उग्रामाति
ष्ठेत्याह। इन्द्रियमेवावरुन्धे। विराजमातिष्ठेत्याह। अन्नाद्यमेवावरुन्धे। उदीची
मातिष्ठेत्याह। पशूनेवावरुन्धे। ऊर्ध्वामातिष्ठेत्याह। सुवर्गमेव लोकमभिजयति। अ
नूज्जिहीते। सुवर्गस्य लोकस्य समष्ट्यै॥२॥ मारुत एष भवति। अन्नं वै मरुतः।
अन्नमेवावरुन्धे। एकविꣳशतिकपालो भवति प्रतिष्ठित्यै। यो वै इन्द्रियेण वीर्येण
णः। तं मध्यतउपदध्याति। ग्राम्यैरेव पशुभिरारण्यान्पशून्परिगृह्णाति। तस्मा
दारण्याः पशुभिराऱण्याः पशवः परिगृहीताः। पृथिव्यैस्यः। अभ्यविच्यते॥३॥
सराष्ट्रं नाभवत्। स एतानि पार्थान्यपश्यत्। तान्यजुहोत्। तेनैव सराष्ट्रमभवत्॥

॥८१॥ यस्यार्थानि जुहोति। राष्ट्रमेव भवति। बार्हस्पत्यं पूर्वेषामुत्तमं भवति। ऐंद्रमुत्त
रेषां प्रथमं। ब्रह्म चैवास्मै क्षत्रं च समीची दधाति। अथो ब्रह्मन्नेव क्षत्रं प्रतिष्ठापयति
ग ॥४॥ षट्पुरस्तादभिषेकस्य जुहोति। षडुपरिष्टात्। द्वादश संपद्यंते। द्वादश मासाः
संवत्सरः। संवत्सरः खलु वै देवानां पूः। देवानामेव पुरं मध्यतो व्यवसर्पति। न
स्य न कुतश्चनोपाव्याधो भवति। भूतानामवेष्टीर्जुहोति। अत्रात्र वै मृत्युर्जाय
ते। यत्र यत्रैव मृत्युर्जायते। तत एवैनमवयजते। तस्माद्राजसूयेनेजानः सर्वमायु
रेति। सर्वे ह्यस्य मृत्यवोऽवेष्टाः। तस्माद्राजसूयेनेजानो नाभिचरितवै। प्रत्यगे
नमभिचारस्तृणुते॥५॥ रुचे समभ्याश्लिष्यन्तश्छापयति जायते पंच च॥७॥
सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादिति शार्दूलचर्मोपस्तृणाति। यवस्मो ॥८१॥

मे त्विषिः। या शार्दूले। तामेवावरुंधे। सोमो वा एष वर्णः। यच्छार्दूलः। अमृतं वै हिर
ण्यं। अमृतमसि मृत्योर्मा पाहीति हिरण्यमुपास्यति। अमृतमेव मृत्योरंतर्धत्ते।
शतमानं भवति॥१॥ शतायुः पुरुषः शतेंद्रियः। आयुष्येवेंद्रिये प्रतितिष्ठति
। दिद्योन्मा पाहीत्युपरिष्टादधिनिदधाति। उभयत एवास्मै शर्म दधाति
। अवेष्टा दंदशूका इति क्लीबं सीसेन विध्यति। दंदशूकानेवावयजते। त
स्मात्क्लीबं दंदशूका दँशुकाः। निरस्तं नमुचेः शिर इति लोहितायसं निरस्य
ति। पाप्मानमेवं नमुचिं निरवदयते। प्राणा आत्मनः पूर्वेऽभिषिच्या इत्याहुः॥
२॥ सोमो राजा वरुणः। देवा धर्मसुवश्च ये। ते ते वाचँ सुवंतां ते ते प्राण
ँ सुवंतामित्याह। प्राणानेवात्मनः पूर्वानभिषिंचति। यद्ब्रूयात्। अग्नेस्त्वा

Indira Gandhi National Centre for the Arts

॥८२॥ तेजसाभि षिंचामीति। तेजस्व्येव स्यात्। दुश्चर्मा तु भवेत्॥ षिंचामीति। तेजस्व्ये
एकु वस्यात्। दुश्चर्मा तु। सोमस्य त्वा द्युम्नेनाभि षिंचामी स्वाहा। सौम्या वै देवतया पु
रुषः॥३॥ स्वयैवैनं देवतयाभि षिंचति। अग्नेस्तेजसे स्वाहा। तेज एवास्मिन्द
धाति। सूर्यस्य वर्चसे स्वाहा। वर्च एवास्मिन्दधाति। इंद्रस्येंद्रियेण स्वाहा। इं
द्रियमेवास्मिन्दधाति। मित्रावरुणयोर्वीर्येण स्वाहा। वीर्यमेवास्मिन्दधा
ति। मरुतामोजसे स्वाहा॥४॥ ओज एवास्मिन्दधाति। क्षत्राणां क्षत्रपतिरसी
स्वाहा। क्षत्राणामेवैनं क्षत्रपतिं करोति। अति दिवस्पाही स्वाहा। असपत्नान्पाही
ति वा वेतदाह। समावव्रत्रन्नधरागुदीचीरि स्वाहा। राष्ट्रमेवास्मिन्ध्रुवमकः। उच्छे
षणेन जुहोति। उच्छेषणशु॥ भागो वै रुद्रः। भागधेयेनैव रुद्रं निरवदयते॥५॥ उ
दग्धरे स्वामी ध्रे जुहोति। एषा वै रुद्रस्य दिक्। स्वायामेव दिशि रुद्रं निरवदय ॥८२॥

ते। रुद्र यत्ते क्रयी परं नाम तस्मै स्वाहा। यद्वा अस्य क्रयी परं नाम तेन वा एष हिनस्ति। य
ं हिनस्ति। तेनैवैनं सह शमयति। तस्मै हुतमसि यमेष्टमसि स्वाहा। यमादेवा
स्य मस्तुम वयजते॥६॥ प्रजापते न त्वदेता न्यन्य इति तस्य गृहे जुहुयात्। यं काम
येत राष्ट्रमस्य प्रजाः स्यादिति। राष्ट्रमेवास्मै प्रजा भवति। पर्णमयेनाध्वर्युरभिषिं
चति। ब्रह्मवर्चसमेवास्मिन्त्विषिं दधाति। औदुंबरेण राजन्यः। ऊर्जमेवास्मिन्नाद्य
दधाति। आश्वत्थेन वैश्यः। विशमेवास्मिन्पुष्टिं दधाति। नैयग्रोधेन जन्यः।
मित्राण्येवास्मै कल्पयति। अथो प्रतिष्ठित्यै॥७॥ भवस्याहुः पुरुषओजसे स्वा
हा निरवदयनेयजते जन्याद्वेय॥८॥ इंद्रस्य वज्रोसि वार्त्रघ्न इति रथमुपावह
रति विजित्यै। मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि स्वाहा। ब्रह्मणैवैन
देवसाभ्यां युनक्ति। प्रष्टिवाहिनं युनक्ति। प्रष्टिवाही वै देवरथः। देवरथमेवास्मै

Indira Gandhi National Centre for the Arts

॥८३॥ युनक्ति। त्रयोऽश्वा भवंति। रथश्चतुर्थः। द्वौ सव्येष्ठसारथी॥ षट्संपद्यते॥१॥ षड्वा ऋ
तवः॥ ऋतुभिरेवैनं युनक्ति। विष्णुक्रमान्क्रमते। विष्णुरेव भूत्वेमाँल्लोकानभिजय
तीस ति। यः क्षत्रियः प्रतिहितः। सोऽन्वारभते। राष्ट्रमेव भवति। त्रिष्टुभमन्वारभते। इंद्रियं
वै त्रिष्टुक्। इंद्रियमेव यजमाने दधाति॥२॥ मरुतां प्रसवे जेषमिति स्वाहा। मरुद्भिर्वै
व प्रसूत उज्जयति। आप्तं मन इति स्वाहा॥ यदेव मनसेप्सीत्। तदाप्नोत्। राजन्यं जिना
ति। आनाक्रांतस्त्वाक्रमते। वि वा एष इंद्रियेण वीर्येण ऋध्यते। यो राजन्यं जिनाति।
समहमिंद्रियेण वीर्येण स्वाहा॥३॥ इंद्रियमेव वीर्यमात्मन्धत्ते। पशूनां मन्युर
सि तवेव मे मन्युर्भूयादिति वाराही उपानहावुपमुंचते। पशूनां वा एष मन्युः। य
द्वराहः। तेनैव पशूनां मन्युमात्मन्धत्ते। अभि वा इयं सुषुवाणं कामयते। तस्ये ॥८३॥
श्वरेंद्रियं वीर्यमादातोः। वाराही उपानहावुपमुंचते। अस्या एवांतर्धत्ते। इंद्रि

य स्य वीर्यस्यानादाने॥४॥ नमो मात्रे पृथिव्या इति स्वाहा। हिंसायै। इयदस्यायुरस्यायु
र्मे धेहि स्वाहा। आयुरेवात्मन्धत्ते। ऊर्गस्यूर्जं मे धेहि स्वाहा॥ ऊर्जमेवात्मन्धत्ते। युङ्ङ
सि वर्चोसि वर्चो मयि धेहि स्वाहा। वर्च एवात्मन्धत्ते। एकधा ब्रह्मण उपहरति। ए
कधैव यजमान आयुरूर्जं वर्चो दधाति। रथविमोचनीया जुहोति प्रतिष्ठित्यै
॥५॥ त्रयोऽश्वा भवंति। रथश्चतुर्थः। तस्माच्चतुर्जुहोति। यदुभौ सत्वा न तिष्ठतां
। समानं लोकमियातां। सह संग्रहीत्रा रथवाहने रथमादधाति। सुवर्गादे
वैनं लोकादंतर्दधाति। हंसः शुचिषदिति सादधाति। ब्रह्मणे वेनमुपावहर
ति। ब्रह्मणा दधाति। अतिच्छंदसा दधाति। अतिच्छंदा वै सर्वाणि छंदांसि
सर्वेभिरेवैनं छंदोभिरादधाति। वर्ष्म वा एषा छंदसां। यदतिच्छंदाः। यदतिच्छ
ंदसा दधाति। वर्ष्मैवैनं समानानां करोति॥६॥ पद्यते दधाति वीर्ये लोस्वाहा

Indira Gandhi National
Centre for the Arts

॥८५॥ मात्रै पितृ विस्यै ब्रह्मणा दधाति सप्तच ॥१॥ मित्रोसि वरुणोसीत्याह । मैत्रं वा अहः
॥ वारुणी रात्रिः । अहोरात्राभ्यामेवैनमुपावहरति । मित्रोसि वरुणोसीत्याह ।
येक मैत्रो वै दक्षिणः । वारुणः सव्यः । वैश्वदेव्यामिक्षा । स्वमेवैनो भागधेयमुपावहर
ति । समहं विश्वैर्देवैरित्याह ॥१॥ वैश्वदेव्यो वै प्रजाः । ता एवाद्याः कुरुते । क्षत्रस्य
नाभिरसि क्षत्रस्य योनिरसीत्यधीवासं समास्तृणाति सयोनित्वाय । स्योनामा
सीद सुषदामासीदेत्याह । यथायजुरेवैतत् । मा त्वा हिंसीन्मा मा हिंसी
दित्याहाहिंसायै । निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुरि
त्याह । साम्राज्यमेवैनं सुक्रतुं करोति ॥ ब्रह्मा३न्त्वं राजन्ब्रह्मासीन्द्रोसि स
वितासि सत्यसव इत्याह । सवितारमेवैनं सत्यसवं करोति ॥२॥ ब्रह्मा३न्त्वं ३
राजन्ब्रह्मासीन्द्रोसि सत्यौजा इत्याह । इन्द्रमेवैनं सत्यौजसं करोति । ब्रह्मा३ ॥८५॥

न्त्वं राजन्ब्रह्मासि मित्रोसि सुशेव इत्याह । मित्रमेवैनं सुशेवं करोति । ब्रह्मा३न्त्व
ं राजन्ब्रह्मासि वरुणोसि सत्यधर्मेत्याह । वरुणमेवैनं सत्यधर्माणं करो
ति । सवितासि सत्यसव इत्याह । गायत्रीमेवैतेनाभिव्याहरति । इन्द्रोसि सत्यौजा इ
त्याह । त्रिष्टुभमेवैतेनाभिव्याहरति ॥३॥ मित्रोसि सुशेव इत्याह । जगतीमेवैतेना
भिव्याहरति । सत्यमेता देवताः । सत्यमेतानि छन्दांसि । सत्यमेवावरुन्धे । व
रुणोसि सत्यधर्मेत्याह । अनुष्टुभमेवैतेनाभिव्याहरति । सत्यानृते वा अनुष्टु
प् । सत्यानृते वरुणः । सत्यानृते एवावरुन्धे ॥४॥ नैनं सत्यानृते उदिते हि
ंसतः य एवं वेद । इन्द्रस्य वज्रोसि वार्त्रघ्न इति स्फ्यं प्रयच्छति । वज्रो वै स्फ्यः । वज्रे
णैवास्मा अवरपरं रन्धयति । एवं हि तच्छेपः । यदस्मा एतेन पर्यपुः ॥
दिशोभ्ययं राजाभूदिति पञ्चाक्षान्प्रयच्छति । एते वै सर्वेयाः । अपराजायिन

Indira Gandhi National Centre for the Arts

=५॥ मेवै॰ करोति॥५॥ओदनमुद्रुवते।परमेष्ठी वा एषः॥यदोदनः॥परमामेवै
नं श्रियं गमयति॥सुश्लोकां३ सुमंगलां३ सत्यराजा३निस्याह।आशिषमेवै
ब तामाशास्ते।शौनःशेपमाख्यापयते।वरुणपाशादेवैनं मुञ्चति।परःशतं भवति।श
तायुःपुरुषःशतेंद्रियः।आयुष्येवेंद्रिये प्रतितिष्ठति।मारुतस्य वैकविंशतिकपालस्य
वेश्वदेव्ये चामिक्षा याऽग्नयस्विष्टकृते समवद्यति।देवतामिरेवैनमुभयतः परिगृ
ह्णाति।अपां नप्त्रे स्वाहा ऊर्जो नप्त्रे स्वाहाऽग्नये गृहपतये स्वाहेति तिस्र आहुतीर्जुहोति
त्रय इमे लोकाः।एष्वेव लोकेषु प्रतितिष्ठति॥६॥देवैरित्याह सत्यसवं करोति त्रिष्टु
भमेवैतेनाभिव्याहरति स्यान्तत एवावरुन्धे करोति शतेंद्रियः षट् च॥एतद्ब्राह्मणानि
धात्रे र नि नां दे वसुवामर्थ्यौ तौ देवीर्दिशः सोमस्येड्स्य मित्रो दश।ब्रह्मा चतुष्षष्टिः॥६४॥
हशीः ऊं वरुणस्य सुषुवाणस्य दशधेंद्रियं वीर्यं परापतत्।तत्सं सृङ्भिरनुसमसर्पत्।तत् ॥८५॥
॥८॥ एतद्ब्राह्मणानि वैश्वदेवं त्रिकपालमन्तं वैहमाना रागादिग्रउदङ्परस्तब्रह्मां३ लराजं चतुष्षष्टिः २

स्सं सृपां संसृपत्वम्।अग्निनादेवेन प्रथमेऽहन्ननुप्रायुङ्क्त।सरस्वत्या वाचा द्वितीये स
वित्रा प्रसवेन तृतीये पूष्णा पशुभिस्त एतद्ब्राह्मणानि वैश्वदेवं त्रिकपालमन्तं वै पुष्या वा शास्वेच्छ
स्यहृदिशादऊर स मिश्चतुर्थो बृहस्पतिना ब्रह्मणा पञ्चमे।इंद्रेण देवेन षष्ठे।वरुणेन
स्वया देवतया सप्तमे॥१॥सोमेन राज्ञाऽष्टमे।त्वष्ट्रा रूपेण नवमे।विष्णुना यज्ञेनाप्नोत्
यत्संसृपां भवंति॥इंद्रियमेव तद्वीर्यं यजमान आप्नोति।पूर्वापूर्वा वेदिर्भवति।
इंद्रियस्य वीर्यस्यावरुद्ध्यै॥पुरस्तादुपसदां सौम्येन प्रचरति।सोमो वै रेतोधाः।
रेत एव तद्दधाति।अंतरा त्वाष्ट्रेण रेत एव हितं त्वष्टा रूपाणि विकरोति।उपरिष्टा
द्वैष्णवेन।यज्ञो वै विष्णुः।यज्ञ एवांततः प्रतितिष्ठति॥२॥सप्तमे दधाति पंच च॥१॥जा
मि वा एतत्कुर्वंति।यत्सद्यो दीक्षयंति सद्यः सोमं क्रीणंति।पुंडरिस्रजां प्रयच्छत्यजा
मित्वाया अंगिरसः सुवर्गं लोकं यंतः।अप्सु दीक्षातपसी प्रावेशयन्।तत्पुंडरीक

॥८५॥ मभवत्। यस्तुंदुरीराजां प्रयच्छति। सात्वादेवदिश्यातपत्री अवरुंधे। दशभिर्वत्स
तरैः सोमं क्रीणाति। दशाक्षरा विराट्॥१॥ अन्नं विराट्। विराजैवान्नाद्यमवरुंधे। पु
ष्करा भवंति संइद्वायाद्दशपेयो भवति। अन्नाद्यस्यावरुध्ये। शतं ब्राह्मणाः पिब
ति॥ शतायुः पुरुषः शतेंद्रियः॥ आयुष्येवेंद्रिये प्रतितिष्ठति॥ सप्तदशं स्तोत्रं भव
ति। सप्तदशः प्रजापतिः॥२॥ प्रजापतेराप्त्यै। प्राकाशावध्वर्यवे ददाति। प्रकाशमे
तेनी वैनं गमयति। स्रजमुद्गात्रे। व्यवाश्मेवासयति॥ रुक्मं होत्रे। आदित्यमेवास्माउ
न्नयति। अश्वं प्रस्तोतृप्रतिहर्तृभ्यां। प्राजापत्यो वा अश्वः॥ प्रजापतेराप्त्यै॥३॥ द्वाद
शपष्ठौहीर्ब्रह्मणे। आयुरेवावरुंधे। वशां मैत्रावरुणाय। राष्ट्रमेव वश्यकः॥ ऋष
भं ब्राह्मणाच्छंसिने। राष्ट्रमेवेंद्रियाव्यकः॥ वाससी नेष्टापोतृभ्यां। पवित्रे एवा
स्पेते। स्थूरयवाचितमच्छावाकाय। अंततरेव वरुणमवयजते॥४॥ अनड्वाह ॥८६॥

मश्राये। वक्रिणौ अनड्वान्। वक्रिरश्मीन्। वक्रिणैव वक्रियज्ञस्यावरुंध्ये। इंद्रस्तु
षुवाणस्य त्रेधेंद्रियं वीर्यं परापतत्। भृगुस्तृतीयमभवत्। श्रायंतीयं तृतीयं। सर
स्वतीतृतीयं। भार्गवो होता भवति। श्रायंतीयं ब्रह्मसामं भवति। वारवंतीयमग्निष्टो
मसामं। सारस्वतीरपो गृह्णाति। इंद्रियस्य वीर्यस्यावरुंध्ये। श्रायंतीयं ब्रह्मसामं
भवति।ति। इंद्रियमेवास्मिन्वीर्यं श्रयति। वारवंतीयमग्निष्टोमसामं। इंद्रिय
मेवास्मिन्वीर्यं धारयति॥५॥ विराट्प्रजापतिरश्वः प्रजापतेराष्टो यजते ब्रह्म
सामं भवति सप्तच॥२॥ ईश्वरो वा एष दिशोऽनून्मदितोः। यं दिशोऽनुव्याख्यापयंति।
दिशामवेष्ट्यो भवंति। दिक्ष्वेव प्रतितिष्ठत्यनुन्मादाय। पंचदेवता यजति। पंचदिशः
दिक्ष्वेव प्रतितिष्ठति। हविषो हविष इष्ट्वा बार्हस्पत्यस्य समभिघारयति। यजमानदे
वत्यो वै बृहस्पतिः। यजमानदेवत्यो वै बृहस्पतिः। यजमानमेव तेजसा समर्द्धयति॥१॥

Indira Gandhi National Centre for the Arts

॥८१॥ आदित्यां मल्हां गर्भिणीमालभते। मारुतीं पृश्निं पष्ठौहीं। विशं चैवास्मै राष्ट्रं च समीची
दधाति। आदित्यया पूर्वया प्रचरति। मारुत्योत्तरया। राष्ट्र एव विशमनुबध्नाति।
चवति उच्चैरादित्याया आश्रावयति। उपांशु मारुत्यै। तस्माद्राष्ट्रं विशमतिवदति। गर्भि
ण्यादित्या भवति॥२॥ इन्द्रियं वै गर्भः। राष्ट्रमेवेंद्रियाव्यकः। अगर्भा मारुती। विड्वै म
रुतः। विशमेव निरिंद्रियामकः। देवासुराः संयत्ता आसन्। ते देवा अश्विनोः पूषन्वा
चः सत्यꣳ संनिधाय। अनृतेनासुरानभ्यभवन्। तेऽश्विभ्यां पूष्णे पुरोडाशं द्वादश
कपालं निरवपन्। ततो वै ते वाचः सत्यमवारुंधत॥३॥ यदश्विभ्यां पूष्णे पुरोडाशं
द्वादशकपालं निर्वपति। अनृतेनैव भ्रातृव्यानभिभूय। वाचः सत्यमवरुंधे। स
रस्वते सत्यवाचे चरुं। पूर्वमेवोदितं। उत्तरेणाभिगृणाति। सवित्रे सत्यप्रसवा ॥८१॥
य पुरोडाशं द्वादशकपालं प्रसूत्यै। दूतान्प्रहिणोति। आविदएता भवति। आवि

दमेवैनं गमयति। अथो हूतेभ्य एव न छिद्यते। तिसृधन्वꣳ शुष्कदृतिर्दक्षिणा
समृद्ध्यै॥४॥ अर्द्धयति मवसातुं धनगमयंति द्वे च॥२॥ आग्नेयमष्टाकपालं निर्व
पति। तस्माद्धिरण्यं कुरूपं बालाः प्राचीयाति। सौम्यं चरुं। तस्माद्बभ्रुसंतव्या वसा
यादयंति। सावित्रं द्वादशकपालं मस्मात्पुरस्ताद्यवानाꣳ सवित्रा विरूपते
। वार्हस्पत्यं चरुं। सवित्रेव विरूप्य। ब्रह्मणा यवानादधते। त्वाष्ट्रमष्टाकपालं॥१॥
रूपाण्येव तेन कुर्वतो वैश्वानरं द्वादशकपालं। तस्माज्जोचन्येनेद्यो प्रसं चःकु
रूपं बालायांति। सारस्वतं चरुं निर्वपति। तस्मात्प्राव षि सर्वा वाचो वदंति। पौष्णं
न व्यवस्यंति। मैत्रेण कृषंते। वारुणेन विधृता आसते। क्षेत्रपत्येन पाचयंते॥ आ
दित्येनादधते॥२॥ पाशिमास्य नाति हृजीवꣳ वि निरुप्याणीत्याहुः। तेनैव त्रूनप्रयुंक्त
दुति। अथो खल्वाहुः। कः संवत्सरं जीविष्यतीति। षडेव पूर्वेद्युर्निरूप्याणि। षडु
त्तरेद्युः। तेनैव त्रूनप्रयुंक्ते। दक्षिणो रथवाहनवाहः पूर्वेषां दक्षिणा। उत्तर उत्तरे

Indira Gandhi National
Centre for the Arts

॥८८॥ षो। संवत्सरस्यैवाप्तो युक्त्यै। सुवर्गस्य लोकस्य समष्ट्यै॥३॥ बार्हस्पत्यमष्टाकपालं दद्यात्
पुनर्नवेकं च॥४॥ इंद्रस्य सुषुवाणस्य दशधेंद्रियं वीर्यं परापतत्। स यत्प्रथमं निर
ष्ठीवत्। तत्कुवलमभवत्। यद्द्वितीयं। तद्बदरं। यत्तृतीयं। तत्कर्कंधु। यन्नस्तः। स सिं
पस्ती हः। यदक्ष्योः॥१॥ स शार्दूलः। यत्कर्णयोः। स वृकः। य ऊर्ध्वः। स सोमः। या वाची॥
सा सुरा। त्रयाः सक्तवो भवंति। इंद्रियस्यावरुध्यै। त्रयाणि लोमानि॥२॥ त्विषि
मेवावरुंधे। त्रया ग्रहाः। वीर्यमेवावरुंधे॥ नाम्ना दशमी। नव वै पुरुषे प्राणाः। ना
भिर्दशमी। प्राणानिंद्रियं वीर्यं। प्राणानेवेंद्रियं वीर्यं यजमान आत्मन्धत्ते। सीसेन क्ली
बाद्वेश्यात्क्रीणाति। न वा एतत्स्त्री न हिरण्यं॥३॥ यत्क्लीबः। न स्त्री न पुमान्।
यत्क्लीबः। न सोमो न सुरा। यत्सौत्रामणी समृद्ध्यै। स्वाद्वीं त्वा स्वादुनेत्याह। सोममे
वेनां करोति। सोमोऽस्य। खिन्नांपयस्व सरस्वत्यै पच्यस्वेंद्राय सुत्रांम्णे पच्यस्वेत्या ॥८८॥

ह। एताभ्यो ह्येषा देवताभ्यः पच्यते। तिस्रः संसृष्टा वसति॥४॥ तिस्रो हि रात्रीः
क्रीतः सोमो वसति। पुनातु ते परिस्रुतमिति यजुषा पुनाति व्यावृत्त्यै। पवित्रेण
पुनाति। पवित्रेण हि सोमं पुनंति। वारेण शश्वता तनेत्याह। वारेण हि सोमं पुनं
ति। वायुः पूतः पवित्रेणेति नेनयापुनीयात्। व्यृद्धो ह्येषः। अतिपवितस्येतया पु
नीयात्। कुविदंग यवमंतो यवं चिदिति यथा पुनाति॥५॥ अनिरुक्तः प्रजापतिः।
प्रजापतेराप्त्यै। एकया यजुषा गृह्णाति। एकधैव यजमाने वीर्यं दधाति। आश्विनं धूम्रमा
लभते। अश्विनौ वै देवानां भिषजौ। ताभ्यामेवास्मै भेषजं करोति। सारस्वतं मेषं। वा
ग्वै सरस्वती। वाचैवैनं भिषज्यति। ऐंद्रमृषभमं संइंद्राय॥६॥ अध्यक्षो मानि
हिरण्यं वसति गृह्णाति भिषज्यसेकं च॥५॥ यत्त्रिषु यूपेष्वालभेत। बहिर्धास्मा
दिंद्रियं वीर्यं दध्यात्। भ्रातृव्यमस्मै जनयत्। एकयूप आलभते॥ एकधैवास्मिं

Indira Gandhi National Centre for the Arts

॥८५॥ न्द्रियं वीर्यं दधाति। नास्मै भ्रातृव्यं जनयति। नैतेषां पशूनां पुरोडाशा भवंति। ग्र
हपुरोडाशा ह्येते। ध्रुवꣳ सुराममस्थिने नि सर्वदेवत्ये याज्यानुवाक्ये भवतः।
छे सर्वा एव देवताः प्रीणाति।।१।। ब्राह्मणं परिक्रीणीयदुच्छेषणस्य पातारं। ब्राह्म
णो ह्याहुꣳ सोऽच्छेषणस्य पाता। यदि ब्राह्मणं न विंदेत्।। वल्मीकवपायामव
नयेत्। सैव ततः प्रायश्चित्तिः। यद्वै सौत्रामण्यै व्यृद्धं तदस्यै समृद्धं। नानादेव
त्याः पशवश्च पुरोडाशाश्च भवंति समृद्ध्यै। ऐंद्रः पशूनामुत्तमो भवति। ऐं
द्रः पुरोडाशानां प्रथमः।।२।। इंद्रिय एवास्मै समीचीं दधाति। पुरस्तादनुयाजा
नां पुरोडाशैः प्रचरति। पशवो वै पुरोडाशाः।। पशूनेवावरुंधे। ऐंद्रमेकादशक
पालं निर्वपति। इंद्रियमेवावरुंधे। सावित्रं द्वादशकपालं प्रसूत्यै। वारुणं द ॥८७॥

शु॰भ॰मा॰सं॰ ७०८८

शकपालं। अंतत एव वरुणमवयजते। वडवा दक्षिणा।।३।। उत वा एष ध्वꣳस्नुते
उतास्वतरं। उत सोमं उत सुरां। यस्सौत्रामण्या समृध्यै। बार्हस्पत्यं पशुं चतुर्थमतिप
वितस्यालभते। ब्रह्म वै देवानां बृहस्पतिः। ब्रह्मणैव यज्ञस्य व्यृद्धमपिवपति। पुरो
डाशवानेष पशुर्भवति। न ह्येतस्य ग्रहं गृह्णाति। सोमप्रतीकाः पितरस्तृप्णुते
ति। शतातृण्णायाꣳ समवनयति।।४।। शतायुः पुरुषः शतेंद्रियः। आयुष्येवें
द्रिये प्रतितिष्ठति। दक्षिणेऽग्नौ जुहोति। पापवस्यसस्य व्यावृत्यै। हिरण्यमंतरा धा
रयति। पूतामेवैनां जुहोति। शतमानं भवति। शतायुः पुरुषः शतेंद्रियः। आयु
ष्येवेंद्रिये प्रतितिष्ठति। यद्वेव शतातृण्णां धारयति।।५।। तन्निदधाति प्रतिष्ठित्यै
पिन्वन्वा एतस्येंद्रियं वीर्यं गच्छति। यꣳ सोमोऽतिपवते। पितृणां याज्यानुवाक्याभि

Indira Gandhi National
Centre for the Arts

॥ ६ ॥

स्प ति

तुपतिष्ठते ॥ यद्देवा स्पपितृ निड्रियंवीर्यंगच्छति ॥ तद्देवाव रुंधे । तिसृभिरुपति
ष्ठते । तृतीये वा इतो लोके पितरः । तानेव प्रीणाति । अथो त्रिणि वै यज्ञस्येंद्रियाणि
अध्वर्युर्होता ब्रह्मा त उपतिष्ठंते । यान्येव यज्ञस्येंद्रियाणि । तैरेवास्मै भेषजं करोति
॥६॥ प्रीणाति अथ मोदक्षिणाः समवनयति धारयंतीड्रियाणि चत्वारि वा ॥६॥
अग्निष्टोममग्र आहरति । यज्ञमुखं वा अग्निष्टोमः । यज्ञमुखमेवारभ्य सवमाक्र
मते । अथैषोऽभिषेवर्त । पश्चतुस्त्रिंशपवमानो भवति ॥ अयस्त्रिंशद्वै देवताः ॥
ता एवाप्नोति । प्रजापतिश्चतुस्त्रिंशः । तमेवाप्नोति । संशार एष स्तोमानाय
यथापूर्वी यद्विषमास्तोमाः ॥१॥ एतावान्वै यज्ञः । यावान्पवमानाः ॥ अत ऊर्ध
मुखा अन्यतो यज्ञसाः पवमानाः । तेनासंशारः । तेन यथापूर्वमात्मनैवाग्नि ॥ ८० ॥
ष्टोमेन र्ध्नोति । आत्मनापुरुषा भवति । प्रजा वा उक्थानि । पशव उक्थानि । य

दुक्थो भवत्यनुसंतत्यै ॥२॥ स्तोमाः पशव उक्थान्येकं च ॥७॥ उपत्वा जामयो गि ॥ ८०
र इति प्रतिपद्भवति । वाग्वै वायुः । वाच एवैषोऽभिषेकः ॥ सर्वासामेव प्रजानां
सूयते । सर्वा एनं प्रजा राजेति वदंति । एतमुसदृशाक्षिपद्रसाह । आदित्या वै प्र
जाः ॥ प्रजानामेवैतेन सूयते । यंति वा एते यज्ञमुखात् । ये स्तोमायाऽअक्रन्नू ॥१॥
यदाह पवस्व वाचो अग्रिय इति । तेनैव यज्ञमुखान्न यंति । अनुष्टुप्प्रथमा भव
ति । अनुष्टुभ्मुत्तमा । वाचा अनुष्टुप् । वाचैव प्रयंति । वाचोद्यंति । उद्वतीर्भवंति ।
उद्वद्वा अनुष्टुभो रूपं । आनुष्टुभो राजन्यः ॥२॥ तस्मादुद्वतीर्भवंति । सोयं तुष्टु
गुत्तमा भवति । सुवर्गस्य लोकस्य संतत्यै । यो वै सवादेति । नैनं सव उपनयति ।
पुरस्तादभ्यपृति । पापीयान्सुषुवाणो भवति । एतानि खलु वै सामानि । यस्य प
नि । यस्य ष्टानि भवंति ॥३॥ तैरेव सवान्नैति । यानि देवराजानां सामानि । तैरमु

॥ ६ ॥

Indira Gandhi National
Centre for the Arts

६१॥

स्मिँल्लोकमृध्नोति। यानि मनुष्यराजानाꣳ सामानि। तैरमुष्मिँल्लोकमृध्नोति।
उभयोरेव लोकयोरृध्नोति। देवलोके च मनुष्यलोके च। एकविꣳशोऽभिषेच-
नीयस्योत्तमो भवति एकविꣳशः केशवपनीयस्य प्रथमः॥ सप्तदशो दशपे-
ग्र० ८ यः॥४॥ विड्वा एकविꣳशः। राष्ट्रꣳ सप्तदशः। विश एवैतन्मध्यतोऽभिषिच्यते।
तस्माद्वा एष विशां प्रियः। विशो हि मध्यतोऽभिषिच्यते॥ यद्वा एनमदो दिशोऽनुव्या-
स्थापयंति। तत्सुवर्गं लोकमभ्यारोहति। यदि मं लोकं न प्रत्यवरोहेत्। अतिजनं
वेयात्। उद्वा माद्येत्। यदेष प्रतीचीनस्तोमो भवति। इममेव तेन लोकं प्रत्यवरोह-
ति। अथो अस्मिन्नेव लोके प्रतितिष्ठत्यन्नमादाय॥५॥ अक्रं राजन्यो भवति दश-
पेयो मा घेत्रीरिवा॥६॥ इयं वै रजता॥ असौ हरिणी। यद्रुक्मौ भवतः। आभ्यामेवै-
नमुभयतः परिगृह्णाति। वरुणस्य वा अभिषिच्यमानः स्यापः। इन्द्रियं वीर्यं नि- ॥६१॥

Indira Gandhi National
Centre for the Arts